
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

श्री. दे. सं. धारे शास्त्री

२९२

४६००

॥ अथ श्री काव्यप्रकाश ॥

प्रारंभः

५ ५९५०

१४०० / २२०० / ३६००

Title - काव्यप्रकाश टीका.
टी. - काव्यप्रदीप.

Author - टी. गोविन्द. (ठक्कुर)

Date - ?

subject - अलंकारशास्त्र.

folio - 136 avalible.

Xerox - 272

काप्र॰
१

श्रीगणेशाय नमः ॥ श्रीलक्ष्मीनृसिंहाभ्यां नमः ॥ सोनोदेव्याः प्रथमतनयः केशवस्यात्मजन्मा श्रीगोविन्दो रुचिकरकवेः स्नेहपात्रं कनीयान् श्रीमन्नारायणचरणयोः सम्यगाधाय चित्तं नत्वा सारस्वतमधिमहः काव्यतत्त्वं व्यनक्ति १ वचनसंदर्भविरोधरूपस्य ग्रंथस्य प्रारिप्सितत्वेन स्तोतुमुचितायाः सेव्यमानाया अवाग्देव्या आस्पदभूतां कविभारतीं तदभिन्नत्वेनाध्यवसितां प्रारिप्सितप्रतिबंधकदुरितशांतये ग्रंथकृत् स्तौति नियतीति कृतनियमरहितां ह्लादैकमयीमनन्यपरतंत्रां नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयतीति नियम्यंते सौरभादयो धर्मा अनेनेति नियतिः असाधारणः पद्मत्वादिरूपो धर्मो ह्लादैकमयीमिति ह्लादेन एकमयीमेकस्वभावां ह्लादमात्रस्वभावामिति यावत् अनन्यपरतंत्रामिति कवेस्त अदृष्टं वा ह्लादैकमयीमिति ह्लादेन एकमयीमेकस्वभावां ह्लादमात्रस्वभावामिति यावत् अनन्यपरतंत्रामिति कवेस्त अदृष्टं वा ह्लादैकमयीमिति ह्लादेन परस्तदायत्ततारहितां परतंत्रा यथा दृश्यवायत्तवचनदूतिकयेति नवरसरुचिरामिति ॥ स्वनिर्माणेऽन्योयस्यात्मनः परस्तदायत्ततारहितां परतंत्रा यथा दृश्यवायत्तवचनदूतिकयेति नवरसरुचिरामिति ॥ स्वनिर्माणेऽन्यो यस्मात्तेन तदनतिरेकेणैव तद्धि तद्व्यतिरेकेण हि परदर्शनात् नन्वेवं तद्व्येवतेरितिहेतत्परदर्शनवैयर्थ्यं तेषां का कर्मधारयः षड्रसा नवरसा तद्वेवतेरितिव्यतिरेकहेतुपरदर्शनात् नन्वेवं नवरसेति रूप दिसाधारणेः षड्रसैरुपलक्षिताप्रतीतेर्नवहेतवेति तदर्थत्वात् अस्तु वा स्तुतीयात्मनुरूप एव नन्वेवं नवरसीतिरूप प्रसंगः त्रिगुणासविकल्पादिवदुपपन्नेः नवरसविरोधः नैरसरुचिरत्वरूपविशिष्टधर्मव्यतिरेकस्तत्र परसेषु न बलाभावेन अयोगव्यवच्छेदि हृद्यत्वप्रयोजकत्वविरहेणामिति हृद्यप्रतिपादकत्वात् अननिर्माणव्यतिरेकेण खेनवलम्बु

मयी

व
राम
२

ख्यात्वविनाशयोर्व्यतिरेकालंकारो व्यंग्यः तथाहि नियतेः शक्त्या नियतरूपा सुखदुःखमोहात्मकसत्वरजस्तमोलक्ष
णा गुणत्रयात्मकत्वाद्धि स्वस्य सुखदुःखमोहस्वभावा परमाण्वादिपत्समवायिकारणांतरदीपर्यायः स्पदं तत्स्वभा न्ति
सहकारिपरतंत्रा मधुरादिषड्रसा च नवमनोरमैवतेर्निर्मितत्वादिसाहृदयवती वक्त्रस्य निर्मितिरिति सुप्रसिद्धमेव
एतद्धि लक्षणानि नियति कृतनियमरहितत्वादिधर्मवत्वेन लोकविनाशत्वं निर्मितिर्निर्दिष्टेति अकोव्यतिरेकः अयं तादृशभावमे
शालिनी अत एव जयति तु उत्कर्षेणावर्त्तते स्वर्षः ननु वर्त्ततामिसर्वः तथासति उत्कर्षस्यासिद्धत्वेन नमस्काराक्षेपकत्वा
नुपपत्तेः ननु एतादृशी गुरुकर्मेति प्रेक्षावतामिष्टदेवताप्रणतिरवश्यं इत्यपनेयुक्तिमतीव तदनेन स्तुतिमात्रमाचरता ग्र
न्थकृता तद्वलेपादहंकाराद्वा अनया प्रयनमयेपवचनतापसंक्ता सपद्यकृतेव तत्किं स्तुतिनिवन्धोपनिवद्धा विशेषाभा
वात्सैव वा किं न्नोपनिवद्धेतिचेत् उच्यते न खलु नतिमात्रोपनिवंधे सुकविर्निवद्धा भवति स्तुतिनिवंधेत्वर्थात्प्रतिरपि ति
निवद्धैव यतो जयत्यर्थेवस्तु विषयस्य चवैशिष्ट्याज्ञमस्कारस्याक्षिप्यते तेनतां मत्यासिन्नप्रणतमतिलभ्यते भवेत्तमनका
व्यत्वात्सिद्धये ऽयं पदशीघ्यातिजयत्यर्थेन चेत्यादीति रूपवृतारयां तदस्तु तेः प्रणामरूपवाच्यस्यानतिरूपितत्वेन ध्वनि
त्वाप्रयोजकत्वात् तदर्थं चातिशयिनी व्यतिरेकालंकारस्येवोपन्यासो चित्याद्दिति इहानिषेधयं गूढरूपमगिनः काव्यस्य

निर्मीयमाणं

का॰प्र॰
२

फलेनसफलमितिप्रेक्षावत्प्रवृत्त्यर्थं प्रतिपादयितुमाह । काव्यंयशसेर्थकृतेव्यवहारविदेशिवेतरक्षतयेसद्यः परनिर्वृत
येकांतासंमिततयोपदेशयुजे ॥ अत्र क्रमतः विवृणु न ब्रूमो भावेक्षि वेताः काव्यंलोकोत्तरवर्णनानिपुणकविकर्मवेसावारयां
ताहृदयवर्णनात्मकं कर्मतत्कवेस्तावत्कालिदासादीनामिवयशः श्रीहर्षादेर्धावकादीनामिवधनं । मयूरादी
नामिवानिष्टनिवारणं च करोति । सहृदयस्यतु काव्यश्रवणानंतरमेव सकलप्रयोजनेषूत्तमं सद्यो विभावास्वाद
नसमुद्भूतं वेद्यांतरसंपर्कशून्यं रसास्वादरूपमानंदं राजादिगतव्यवहारपालनादिसमुचिताचारपरिज्ञानं रामादिव
द्वर्तितव्यमित्यसाधनेन नलरावणादिवदित्युपदेशं च निर्मिमीते । काव्यास्वादनकालेक्रमेरपि सहृदयांतःपातित्वाद्रसा
स्वादः । ननूपदेशार्थनीतिशास्त्राण्येव संति किं तत्र काव्येनेत्यत उक्तं कांतासंमिततयेति । शब्दस्तावत्त्रिविधः प्रभु
संमितः सुहृत्संमितः कांतासंमितश्च । तत्राद्यः शब्दप्रधानो वेदादिः शासनं प्राधान्येन विधिलक्षणः स हि प्रभु
रिवत्वमेवं कुर्विति समाज्ञापयति तत्र श्रनियुक्तः संध्यावंदनादौ नियतफले प्रवर्तते । द्वितीयस्त्वर्थतात्पर्यवान् सिद्धार्थस्व
पः पुराणेतिहासादिः । स हि सुहृदिव एवं कृते इदमिष्टं भवत्येवं कृते इदमनिष्टमिति सेतावन्मात्रं वोधयति नत्वा
ज्ञापयति । तृतीयस्तु तात्पर्यविलक्षणो रसप्रधानः काव्यलक्षणः तत्र हि रसांगीभूतो व्यापारो विभावादिसंयोजना

उपमायाभावव्यतिरिक्तफलाभावे

२

राम
२

कार्व्यार्थमुपभुंजते इत्येव पाठः ४

स्माकं न नारूपो वात त्रिष्णा घ्रा सं भिव्यक्ति निष्पादकतया शब्दार्थयोर्गुणालंकारसस्यैव प्राधान्यं · स वकांता संमित
त्वे नोपदेशं करोति। तेन तदुक्तं भवति · येसु कुमारमतयोति सुखि स्वभावाः राजकुमारादयो नीरसे नीतिशास्त्रे प्र
वर्त्तयितुमशक्यास्तान् काव्यैकांतेव सरसतापादनेनाभिमुखीकृत्योपदेशं ग्राहयति · गुडजिह्विकया विभूनिव
श्रोषधं पाययाहुः। स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुंजते · प्रथमालीढमधवः पिबंति कटु भेषजमिति · यत २
वं विशिष्टं काव्यमतस्तद्धेतुरुपादेयः न न्वेवमभिषेयप्रयोजने किमायातं · किं च हेतुं ज्ञात्वा तदुपादाने कथं स्यादि
त्याकांक्षायां काव्यज्ञशिक्षारूपतया काव्यांगत्वं ग्रंथस्य प्रतिपादयन्नेव कारणांतरमप्याह शक्ति निपुणता लो
कशास्त्रकाव्याद्यवेक्षणात् · काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥ शक्तिः कवित्वबीजभूतो देवताप्रसादा
दिजन्मासंस्कारविशेषः प्रतिभाव्यपदेश्यः तस्याः कारणतायां किं मानमिति चेत् · निपुणतादिकारणांतर
सद्भावेप्यनुपहसनीयकाव्यप्रसरस्य कार्यस्य व्यतिरेकः स च विशेषस्य काव्यप्रसरस्य विशेषणस्यानुपहस
नीयत्वस्य वा व्यतिरेकात्सर्वत्रैवाविशिष्टः नेवेवं कारणांतरं किं विद्यायालं नलं शक्तिरिति वाच्यं · प्रसिद्धातिरेकि
णैव तद्धेतोः शक्तिर्व्यपदेश्यात् ॥ लोकं स्थावरजंगमात्मकं लोकवृत्तं [illegible] भागादुपचाराद्धार्थमिमानपरामर्शस्य [illegible]
ननु कवेः प्रतिभारूपशक्तिः कथं देवताप्रसादादिजन्मासंस्कारविशेष इत्यत आह्नानि [illegible] व्यपदेश्य इति प्रतिभया व्यवहार्य इत्यर्थः ॥४॥
हि।

भेषजमितिपाठः

आवरण [illegible]

श्रवणादिपदेन ग्रहणधारणादिसंग्रहः ।

का॰प्र॰ २ घ

सकलनाधापकत्वात् । शास्त्रं छंदःशास्त्रादि काव्यं महाकविप्रणीतं रघुवंशादि । आदिग्रहणादितिहासादि तेषां विमर्शनात् व्युत्पत्ति
र्निपुणता । काव्यज्ञशिक्षा काव्यं कर्तुं रसानुगुणतया प्रबंधारोपणं वेति तदुपदेशः तया करणे योजनेन योगेन पुनःपुनर्नवेन
प्रवृत्तिरभ्यासः । इति शब्दो मिलितो वस्तु वापनाय । अन्यथा तेषां मध्ये एकमेव स्यात् । तथा च काव्यस्योद्भवे उत्पत्तौ त्रिस्त्र यावौ थेषां
मिलितानामुपधानं दंडचक्रादीनामिव घटे न तु मिलितत्वेन कारणतेवेति भ्रमः कर्तव्यः । एवं कारणमुक्त्वा काव्यस्य लक्षण
माह । तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि । निर्दोषत्वादिविशेषणविशिष्टौ शब्दार्थौ तत्काव्यमिति व्यवहर्त्त
व्यौ । गुणस्य रसनिष्ठत्वेपि तद्व्यंजकपरं गुणपदं । अनलंकृती इत्यस्यार्थः सालंकारत्वविशेषणानुपादानादिति नवा ...
पतः क्वापीत्यनेनैतदुक्तं सर्वत्र सालंकारौ शब्दार्थौ काव्यं किंतु स्फुटालंकारविरहेपि न काव्यत्वहानिः । नत्रो व्याप
वादल्पत्वस्य वा स्फुटत्व एव विश्रामात् । नीरसेप्यस्फुटालंकारे काव्यत्वमिष्टमेवेति । अन्ये तु क्वापि ... नीरसे
स्फुटालंकारविरहिणी न काव्यत्वं । यतो रसादिरलंकारश्च द्वयं चमत्कारहेतुः । तथा च यत्र रसादौ नाम ... तत्र
स्फुटालंकारापेक्षा । यत्र स्वचमत्कारेण रसानुगुणार्थविशेषनिबंधनमलंकारविरहेपि क्षात्यादि ...

स्था

रा ३

ल
ड्डो
वे

पुष्णातियथा॰ मुनिर्जयतियोगीन्द्रो महात्मा कुंभसंभवः येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ॥ अत्र हि अद्भुतरसानुगुण
मेकचुलुके मत्स्यकच्छपदर्शनं छायातिशयं पुष्णातीति ॥ नीरसे तु यदि स्फुटालंकारो न स्यात् किं कृतः चमत्कारः स्यात् चमत्का
रसारं च काव्यमिति अवश्यं स्फुटालंकारापेक्षा अन्यत्र कृती पुनः क्वापि सन्नेनापि अस्फुटालंकारे किं विदेवकाव्यत्वं म
न रसादिः [illegible] स्फुटेन च सर्वत्र सैव तदेव प्रतिपाद्यते तस्मात् अलंकारत्वमात्रं न विशेषणं किं तु स्फुटालंकारे रसाद्यन्य
तरत्वं नैव चैवमपि रसवत्सु न लंकारे काव्यत्वप्रसंगो दोषाय इष्टापत्तेः यथा उदाहृते मुनिर्जयतीत्यादौ यदि तस्मादा आ
श्लेषेन नतत्रापि काव्यलक्षणमतः अलंकारत्वे सत्यपि दूरगामित्वमिति स्फुटालंकारविरहे काव्यत्वं यथा यः कौमारहरः स
एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदंबानिलाः सा चैवास्मि तथापि तत्र सुरतव्यापारली
लाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कंठते अत्र रूपकादीनामसंभव एव अस्फुटत्वम् विभक्ति विपरीतम् नादय
स्तु दीपकमिति चेत् न अस्फुटस्य अस्माहमर्थकाव्यत्वात् अत्रास्मि करोमि सख्ये इतिवत् क्रियापदत्वेन दीपक
त्वे तदन्वितानां सर्वेषां प्राकरणिकत्वात् दीपकस्य तु प्राकरणिकाप्राकरणिकविषयत्वात् सादृश्याप्रतीतेश्च न

तुल्ययोगिता तौ समुच्चयोपि वक्ष्यमाणलक्षणो न संभवत्येव । अता ह्याश्रमवनवारुत्व हेतौ । विशेषोक्ति विभावने विद्यमाने अपि
न स्फुटे । कथं प्रतिवेत्तृत्वं विशेषोक्तिस्तावत्कारणसत्वेपि कार्याभाववचने अत्र चानुत्कंठाकारणीवरोपकरणयोरूपमत्वे
तात्सत्वेप्यनुत्कंठाभावेनुत्कंठारूपो निर्दिष्टः एवं तथापि नानुत्कंठाभावत्वेन किं तूत्कंठात्वेनैव । तस्मादस्फुटत्वमस्याः
यदि चेतानुत्कंठितेनेत्यभिधीयेत तदा स्फुटत्वं भवेत् । एवं कारणाभावेपि कार्योत्पत्तिवचनं विभावना । अत्रैवोत्कंठाकारणं वरो
पकरणापोरतसातदतावश्योकरवपद्यपि तथापि नातत्राविरहत्वेन किं तु तत्तारूपेणैव । अभावाभावस्य तत्वात् । अतो अस्या अ
स्फुटत्वमेव । न च स एवेत्येवकारेण तत्ताभावप्रतीतिरत्ताभावत्वेन प्रतीतौ कथमस्फुटत्वमिति वाच्यं विशेषणासंगतेनैवका
रेण विशेष्ये विशेषणायोगस्य व्यवच्छेदो हि प्रत्याय्यते ननु विशेषणाभावाभाव एवाहत्य पर्यवसानं तत्रेयमस्फुटत्वमेव
एवं विशेष्यसंगतेनाप्येवकारेण विशेष्यभिन्ने विशेषणाभाव एव नाहत्य प्रत्याय्यते किं तु विशेषणायोगाभाव इति द्रष्टव्यं । अ
त एव पांडवः पांडरस्त्वेत्यादौ नापांडर इति पार्थ एव धनुर्धर इत्यादौ नान्यो धनुर्धर इत्यादि कदाचित्स्फुटत्वार्थं प्रयुज्य
ते दृ अप्याहत्य न सुखं न सुखेनैव तत्स्पेनान्येनकेनचित इति । अन्यथा पुनरुक्तिस्तत्रस्यादिति । अनयोरस्फुटत्वे संदेह
रूपसंकरोप्यस्फुट इति विभावनीयं शृंगाररूपरसस्य सत्वाद्रसवदलंकारः स्फुट एवेति चेत् न । रसस्यात्र प्राधान्या

ध्व

तत्र प्राधान्य एव तस्यालंकारत्वोपगमात्। अर्वाचीनास्तु यथोक्तस्य काव्यलक्षणत्वे काव्यलक्षणं प्रविरलविषयं निर्वि-
षयं वा स्यात् तद्दोषाणां दुर्वारत्वात्। तस्माद्वाक्यं रसात्मकं काव्यमिति तल्लक्षणं तन्न। चतुष्टेऽपि रसान्वये काव्यत्वमस्त्येव परं त्वपक-
र्षमात्रं तद्वत्। कीटानुविद्धरत्नादिसाधारण्येन काव्यता। दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुट इति। एवं चालंकारादिस-
त्त्वेऽप्युत्कर्षमात्रं। नीरसे तु चित्रादौ काव्यव्यवहारो गौण एवेत्याहुः। अथास्य भेदानन्तलक्षणान्याह। इदमुत्तममतिशयिनि व्यं-
ग्ये वाच्याद्ध्वनिर्बुधैः कथितः। इदं काव्यं वाच्यादतिशयिनि अधिकचमत्कारकारिणि व्यंग्ये उत्तमं। पदादिभिः बुधैः स्फोट-
रूपं शब्दब्रह्म व्यज्यते तस्मादभिव्यक्तादर्थप्रत्ययः तादृशस्य स्फोटव्यंजकस्य पदादिशब्दस्य ध्वनिरिति संज्ञेति वैयाकर-
णानां सिद्धांतसरणिः। अतः प्रधानीभूतव्यंग्यव्यंजकत्वसाधर्म्यात् गुणीभूतवाच्यव्यंग्यं व्यंजनसमर्थस्य शब्दार्थयु-
गलरूपस्योत्तमकाव्यस्य बुधैर्ध्वनिपंडितैर्ध्वनिरिति संज्ञा कृता। यथा निःशेषच्युतचंदनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे दू-
रमनंजने पुलकिता तन्वी तवेयं तनुः। मिथ्यावादिनि दूति बांधवजनस्याज्ञातपीडागमे वापीं स्नातुमितो गतासि न पुनस्त-
स्याधमस्यांतिकं। अत्र तदंतिकमेव रंतुं गतासीति प्राधान्येनाधमपदेन व्यज्यते। तेन च व्यंग्यमुख्यार्थबाधाद्विपरीतलक्षणया न-
दंतिकमेव गतासीति लक्ष्यमेव युज्यते न तु व्यंग्यं। अन्यथा स्नाहें तीत्यादि वक्ष्यमाणलक्षणामूलव्यंजनोदाहरणेऽपि वि-

दू

९

१४ नदंतिकमेवगतासीत्यत्र लक्ष्यत इति शेषः कल्पनया योजनीयः व्यज्यत इति रंतुमित्यनेनैवान्वीयत इत्याहुः ॥ परमार्थतस्तु १४

का॰प्र॰
५

परीतलक्षणा न स्यात् विशेषाभावादिति ॥ अत्र केचित् समस्तत्र विपरीतलक्षणा इत्यत्र यस्तु न खलु मुख्यान्वयायोग्यत्वं स्व
रूपसल्लक्षणाबीजं किं तु ज्ञाते तथा च यत्र सर्वस्मादेः प्रसाधकानुकादिसंभोगः प्रमाणान्तरेणाध्यवसितः प्रतीतिमुपगतः तत्र मु
ख्यार्थबाधादस्तु लक्षणा तदभिप्रायेणैव साहित्यसहिस्तु हर्षे उपकृतं बहु तत्र नामैव यत्हतं पत्रं तु प्रमाणान्तरेणानाते ज्ञापक
मवतरतितदा क्वज्ञानितप्रत्ययमहिं नैव लतया रूपस्तत्र कथं लक्षणाबाधाभावात् उत्पन्नोऽपि वाक्यार्थबोधे न बन्नापि
बाधोऽकिंचित्कर एव तदभिप्रायेणैव वापीस्नातुमित्यादाहृतं अत एवोक्तमधमपदेन व्यज्यत इति · अत एव च पञ्चसप्ताद दे
स्नातुं व्यक्तं न प्रमाणान्तरेणावगतं तत्र न साहेतीत्यादौ विपरीतलक्षणा व्यंग्यार्थप्रतीतिर्वापीस्नातुमित्यादौ तु बाधानव
तारे स्वधमपदार्थोपर्यालोचनया व्यंग्यप्रतीतिः अत एव दृश्यैव प्राधान्यमधमपदस्य तस्मात्साहेतीत्यादौ पदिभ्रम्ना
तया लक्षणामूलैव वापीस्नातुमित्यादौ तु न नियमः ॥ यत्तादृग्गुणीभूतव्यंग्यव्यंग्ये [illegible] तनधर्मे तादृशि वाच्यादन
तिशायिनि अतिशयितचमत्कारानाधायके व्यंग्ये मध्यमकाव्यं [illegible] ग्रामतरुणं स्व परस्या गमित्यादिना गुणीभूतव्यंग्य
प्रभेदत्वेन प्रतिपिपादयिष्यमाणस्यास्फुटव्यंग्यस्याभेदेनाहायत्तैः किं त्वस्फुटत्वातिरिक्तव्यंग्यपरं व्यंग्यपदं गुणीभू
तव्यंग्ये वास्फुटमात्रं व्यंग्यं अधमकाव्ये त्वस्फुटत्वं तद्धि रह एकवेति न काचिदनुपपत्तिः उदाहरणं तु मामनरूपेणेतरू

३४ तद्गुणीभूतव्यंग्यं पकथितमित्यनुषज्यते अत्र व्यंग्ये स्फुटव्यंग्यपदत्यर्थः तेन नाधमकाव्यानि व्याप्तिरिति केषांचिन्मतमयुक्तं ३

रा॰म
५

ण्या नववंजुलमंजरीसनाथकरं पश्यंत्या भवति मुहुर्नितरां मलिना मुखच्छाया॥ अत्र वंजुललतागृहे दत्तसंकेता तरुणी नाग

नं। तेति व्यंग्यं तद्गुणीभूतं दयेक्षया वाच्यस्यैव चमत्कारकारित्वात् यतः पश्यंत्या नितरां मुखच्छाया मलिना भवतीत्यनेन द

र्शनकाले स्वतत्कार्यमालिन्यं तस्यातिशयः स तन्यमानत्वादिति वाच्यं चमत्कारि अनुभावत्वेन विप्रलंभपोषकं प्रतीयत

इति शब्दचित्रं वाच्यचित्रमव्यंग्यं त्ववरं स्मृतं अत्र चित्रमिति लक्ष्या हार्यते तेनाव्यंग्यं काव्यमवरमधमं तच्चित्रमिति कथितमित्यर्थः

•अव्यंग्यं अस्फुटतरातिरिक्तं व्यंग्यरहितं तादृशं चास्फुटतरव्यंग्यसद्भावे व्यंग्यमात्राभावे वा चित्रं गुणालंकारयोगित्वा

च्चित्रमात्रेयं यथा स्वच्छंदोच्छलदच्छकच्छकुहरच्छातेतरांबुच्छटामूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः भिद्यादुद्यदु

दारदर्दुरदरीदीर्घादरिद्रद्रुमद्रोहोद्रेकमहोर्मिमेदुरमदा मंदाकिनी मंदतां॥ इत्यनुप्रासोऽत्र शब्दालंकारः ननु कथमेतदव्यंग्यमुच्यते

मंदाकिनीविषया याः प्रीतिरभिव्यक्ता किं वा नास्त्येव स काव्यार्थो यस्य न व्यंजकत्वं ततो विभावत्वेनापीति चेत् सत्यं किं तु तदव्यं

ग्यमस्फुटतरं यतस्तत्र न कवेस्तात्पर्यं अनुप्रासमात्र एव तस्य संरंभात् तात्पर्यविषयीभूतव्यंग्यविरहत्वमेव वा व्यंग्यपदेन

विवक्षितं पदद्वयं ध्वनिकृता रसभावादिविषयविवक्षाविरहे सति अलंकारनिबंधो यः स चित्रविषयो मत इति अत्र पक्षे म

ध्यमकाव्यलक्षणे व्यंग्यपदं विवक्षितव्यंग्यपरं द्रष्टव्यं अर्थचित्रं यथा विनिर्गतं मानदमात्ममंदिराद्भवत्युपश्रुत्य यदृच्छया

का०प्र०
६

प्रियंसंसक्तमेंदुद्रुतपातिता ग्लानिमीलिताक्षीवमियामरावती॥ अत्रोत्प्रेक्षार्थालंकारः परंतु रसादेकर्षता सर्यविरहोः स्फुटतर
त्वंवातन्मलायतेहयमीव स्ववर्णनीयतया तत्वभावस्य स्फुटं प्रतीतिः। मदीवंठपद्यमुदाहरणीयं यथा मध्यमोऽस्फुरति स्मनोघन्व
नं कृपान्वक्रमेदाक्षिण्यविपुलपुलिनाभ्यागतो राजहंसः अहं म्लेच्छदेत्वरितवरणान्यासमाकाशलक्ष्म्याः संसर्पत्साः श्रवणपति
तं पुंडरीकं मृगांकः। अत्र रूपकमर्थालंकारस्तु तन्मात्रेता स्पर्शनं तु रसादेः॥ इति महामहोपाध्यायश्रीगोविंदकृते काव्यप्रदी
पे काव्यलक्षणनिर्णयः प्रथमउल्लासः॥ अथ काव्यलक्षणपदार्थेषु स्वरूपलक्षणादिभिर्विविक्तेषु शब्दार्थयोः प्राधान्या
त्प्रथमं तयोः स्वरूपं निरूपयिष्यन् विभागमाह स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यंजकस्त्रिधा शाब्दे व्यंजकः शब्दोन प्रसिद्ध इ
त्यतदुक्रमत्रेति अत्रेति काव्ये शब्दस्वरूपमप्रतिपाद्यैव लाघवाद र्थान्विभजते। वाच्यादयस्तदर्थाः स्युस्तात्पर्यार्थोऽपि केषु
चित्‌ वाच्यादयः वाच्यलक्ष्यव्यंग्याः क्रमेण तेषां वाचकादीनामर्थाः स्युः केषुचिन्न्यायादिनयेषु न कुमारिलमांसकादिमतेत्व
पि॥ आवृत्तपदानां पदार्थमात्रेऽभ्युक्तिर्न तत्वयांशेऽपि गोरवादन्यलभ्यत्वाच्चैतदंशोऽहितान्वयो वाक्यार्थो विलक्ष
णशरीर आकांक्षायोग्यतासन्निधिवशाद्पदार्थोऽपि वाक्यार्थः प्रतीयते न चापदार्थप्रतीतावतिप्रसंगः स्वरूपसतः शाक्या
न्वयत्वस्य नियामकत्वादित्यभिहितान्वयवादिनां मतं। अन्वयरूपे वाक्यार्थेऽपि पदानां शक्तिः व्यवहारेणान्वितस्येव उ

श्रि.

राम
६

पस्थापनात् तत्रैव च शक्तिग्रहात्। किं वान्वयभागस्याशक्यत्वेऽनुभवविषयत्वेन स्यात् तद्विषयत्वे शक्यत्वस्य प्रयोजकत्वात्
अशक्यस्याप्यनुभवप्रवेशेऽतिप्रसंगादिति अन्विताभिधानवादिनां मतं व्यंजकत्वेन केवलं शब्दस्य किं तदर्थस्यापि तत्रापि भिन्ने
कतरस्य किं सर्वस्यापीत्यनिर्धारितविशेषधर्म्यसिद्ध्ये प्रतिपादयति सर्वेषामेव प्रायशो वर्णानां व्यंजकत्वमपीष्यते तत्र वाच्यस्य यथा
मा स्त्वमेव अरण्ये अनुगुणान्विश्वसाहि स्वं त्वमेतानां किंकरिणि ज्ञं रमे प्रणवाससरोरुहं त्वत्रवार्थेनेवार्थेन वक्तुर्वै
शिष्ट्यात् स्वैरविहारार्थिनं त्वं ह्युपकरणत्वादिना वाचकस्य विधेयत्वादिकं व्यज्यते लक्ष्यस्य यथा साहं ते सहिंसु रुहस्र रव
नेरव नेहूमिश्रासिमज्जाकर्ष्णा वरोहरेणि ज्ञं सरि सत्संदावविरहत्र्यं लमन एवात्रापकारस्य बाधावतारात् मुख्यार्थः
श्रोत्रा प्रसिद्धेनुनश्यत इति सद्भावस्नेहकरणीयविसदृशं मलिनपरमेणात्मानं तुल्यावरणरूपं विरचितमिति मुख्यवि
परीतं लक्ष्यते तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यंग्यं व्यंग्यस्य यथा उत्पश्य निश्चलनिष्पन्दा विसिनीपत्रे भि
रेहद्वलाकाशिनिमर्मरगतमाश्रयणपरिहृत्यासं खस्तिर्वस्त्रनिष्पंदत्वेन आश्वस्तत्वं तेन निर्जनत्वं अतः संकेतस्था
नमेतदिति कयाचित् कंचित् संकेतस्थानाभिलाषिणं प्रति व्यंजनया प्रतिपाद्यते अत्र वाभिःस्पंदत्वेन आश्वस्तत्वं तेन
जनागमनाभावो तेन त्वमनागत इति मिथ्यावदसीति कयाचित् संकेतावलेनागता अहं त्वागत इति वादिनं प्रति व्यज्य

स्था

13

४ नामकेचेत्यादि

ते एवमर्थं विभज्य वाचकादीनां स्वरूपं क्रमेणाह साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचकः ॥ अभिधत्ते प्रतिपादयति सोऽर्थः अतो
न विशेषणं तदवच्छेदकं संकेतितं गृहीतसंकेतं इदं च [illegible] अर्थप्रतिपादिकायामतिव्याप्तिवारणाय माधुर्यादिव्यंजक
स्य वर्णादिवर्णेऽतिव्याप्तिवारणाय [illegible] साक्षादिति अधिकं यन्नामायत्र चेत्यादिर्विशेषो विवक्षितस्तदा इत्यादिव्यवहितसंकेत
सत्त्वेपि चेत्यादौ योगिनि विषये प्रतियादीचैत्यादिपदेऽतिव्याप्तिवारकत्वात्तत्र शक्यसंकेतव्यवहितसंकेतत्वात् । न च तत्र
शक्तिरेवेति सम्यक् तद्योगिनि तत्पदप्रयोगस्य लक्षणयैवोपपत्तेः न च साक्षात्संकेतवान् वाचक इत्येतावतैव स्वस्थत्वे
अभिधत्त इत्यस्य वैयर्थ्यं संयोगादिनाऽभिधायां नियमितायां वाच्यार्थव्यंजकतादशायामतिव्याप्तेर्वारणाय [illegible] न च तत्र धा
पितत्वाति व्याप्तिरेवेति वाच्यं यस्य शब्दस्य यत्राव्यवहितसंकेतग्रहो यदर्थग्रहस्तूपपद्यते तत्र स तदर्थवाचक इति हि लक्ष
णार्थः अथ संकेतग्रहस्य शब्दसहकारितायां किं मानमिति चेत् अगृहीतसंकेतस्य तच्छब्दादर्थप्रत्ययाभावादित्यपत्रा
अवधानेन संकेतोऽनुहृत इत्यादिशब्दितदर्शनात् संकेतविशेषणतया साक्षात्पदं व्याख्यातं वैशिष्ट्यत्वं संयोगादिनाऽभिधा
यां नियमितायां यत्र अर्थान्तरव्यञ्जनं तत्र वाचकत्वं मा प्रसांक्षीदिति सन्निधानक्रियाविशेषणं साक्षादिति तत्र तु वाच्यार्थप्र
तीति अवधानेन तत्प्रतीतिरित्यप्रसंगः न च संकेतितपदवैयर्थ्यं [illegible] लक्ष्यप्रतीतावपि वाच्यप्रतीतिव्यवधानाभावात्स्य अर्था

दिवर्णीनो साक्षाद्देवमाधुर्यव्यंजकत्वाद्भास्करस्तल्लक्ष्यस्याप्यन्वितमिथ्या न न येसंकेतितत्वान्न त्राति व्याप्तिवारणाय
साक्षादिति विशेषणं तदनम्भुपगमे तु साक्षादभिधेये संकेतितमभिधेयं इति लक्षणं दर्पणेनाचार्यस्य चेष्टायामति व्याप्तिः
शब्दत्वस्य प्रकरणादेवलाभादित्याह तन्नु साक्षात्संकेतो गृहीतः इत्यादि इष्टो साक्षात्स्वस्य संकेतविशेषणतया व्याख्यानेन
विरोधादुपेक्षणीयं किं वप्रथमे माधुर्यादिव्यंजकस्य शौदिवर्णे व्याप्तिव्याप्तिः तेषां साक्षाद्देवस्य गुणादिव्यंजकत्वात् द्विती
येन वाच्य एव संपतादशार्थ्यां अतिव्याप्तं न च तत्रेष्टापत्तिः संकेतवान्वाचक इत्यस्यैव तद्दासम्य तत्केन दोषे येष्यछीत संके
तितश्च तत्र्मैदोजात्यादिर्जातिरेव वा न न पंविभागो नुपपन्नः जात्यादेरसंकेतितत्वात् आदसंकेतग्रहस्य व्यवहारमा
त्राधीनतया प्रवृत्तिनिवृत्तियोग्यायां व्यक्तावेव तदोषित्यादिति मेवं किंहि व्यक्तिषु सर्वासु संकेतग्रहो व्यवहारो गं उतन्य
स्यां कस्यांचित् नाद्यः आनंत्यात् नान्यो व्यभिचारप्रसंगात् तत्पतो ऽगृहीतसंकेत गोपिंडद्वयवशादेरपि गोपदात् प्रतीतिः
प्रसक्ता अगृहीतसंकेतत्वस्य तुल्यत्वात् किं च न यत्र संकेतग्रहस्तस्यापि प्रतीतिरिति व्यभिचारान्न व्यक्तौ संकेतः अपि
च व्यक्तिसंकेतपक्षे गौः शुक्लः अश्वो डित्थ इत्यत्र चतुर्णां शब्दानामर्थभेदो न प्राप्नोति किं तेष मनिष्टमिति चेत् सहप्रयोगानुप
पत्तिः तस्मादुपाधावेव संकेतः स च द्विविधः स्वभाववतो वक्तृ… वक्तुर्यदृच्छया संनिवेशितो नामरूपः तत्रा

15

का॰प्र॰
८

घो द्विविधः सिद्धः साध्यश्चेति। सिद्धोपि द्विविधः पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च। प्राणप्रदत्वं च यावद्वस्तुस्थिति संबंधित्वे
मपि यस्य त्वादेर्नित्यत्वाभ्युपगमे गोत्वादिना समकालमेव सत्वं भित्वेत्यापि तस्य संबंधं कदापि दर्शयितुं विना गोत्वादेरिति
विशेषः। तत्र प्राणप्रदो जातिः। उक्तं हि वाक्यपदीये न हि गौः स्वरूपेण गौः नाप्यगौः गोत्वाभिसंबंधात्तु गौरिति। अस्यार्थः
गौः स्वरूपेण न गोव्यवहारस्य नाप्यगोव्यवहारस्य विषयः गोत्वाभिसंबंधात्तु गोव्यवहारस्य विषय इति। तथा च प्राणप्र
दत्वमस्यास्तीति विशेषाधानहेतुः गुणः। गोत्वादिना लब्धसत्ताकं हि वस्तु शुक्लादिना विशिष्यते। साध्यस्तु पूर्वा
परीभूतैकदेशत्वेन विवक्षितः क्रियारूपः छेदनादिः। यदुक्तं यावत्सिद्धमसिद्धं वा साध्यत्वेन प्रतीयते। आश्रितक्रमरूपत्वा
त्सा क्रियेत्यभिधीयते इति। वक्तृपदच्छासंनिवेशितस्तु यदृच्छारूपः डित्थादिः। डित्थादिशब्दानां प्रथमवर्णप्रतीत्या किंचित्प्रकाशि
तं मध्यवर्णबुद्ध्याभिः शेषतोऽन्त्यग्राह्यं नानावर्णात्मकत्वादिपदवर्णक्रमममन्यसंस्फोटारव्यं शब्दस्वरूपं डित्थादिष्वर्थेषु उप
पाधित्वेन वक्त्रा पदच्छया कल्प्यत इति संज्ञारूपो पदच्छात्मको डित्थादिः। द्विविधः चेडीदास्त्वकर्मे संस्थलक्षणं बुद्धिः शीवतो
त्वाद्यं यस्य सा जातिप्रतीत्यनंतरं व्यक्तिप्रतीतिरिति क्रममनुमंच डित्थादीनां शब्दानां स्वरूपं डित्थादिष्वर्थेषूपाधित्वे
नपदार्थोपस्थित्यनुकूलतया संकेतस्तु उपाध्येतरैतेषां नास्ति किंतु धर्मिमात्रे ततः प्रतीयत इति च सर्वत्र हेतुश्च भाष्यवि

पा॰म॰
८

रूढं तत्र शब्दस्यैवोपाधित्वेनम आपनात् डित्थादिशब्दात् डित्थादिनामायमितिप्रतीतेः एवं हि गोः शुक्लश्चलो डित्थ इत्यादौ च
चतुष्टयी शब्दानां प्रवृत्तिरिति भाष्यकारः नैवं परमाणवादिशब्दानां जातिशब्दत्वं स्यात् न तु गुणशब्दत्वं परमाणुत्वादीनां
प्रामाण्यप्रदत्वेन जातित्वादिति चेत् सत्यं जातिशब्दा एवैते वैशेषिकनयानुसारेण तत्र गुणशब्दत्वव्यवहारः ननु परमाण्वादिनिष्ठा
नां शुक्लादिगुणानां गुडतंडुलादिनिष्ठानां पाकादिक्रियाणां च भेदस्य प्रत्यक्षतः सिद्धेः शक्तिसंकेतपक्षेऽक्तदोषः समान इ
ति चेन्न गुणादीनां स्वरूपत एकरूपाणामाश्रयभेदाद्भेद इव लक्ष्यते यथा एकस्यैव मुखस्य खड्गमुकुराद्यालंबनभेदात् तस्य
ये रत्नहिमपयःशंखादिशुक्लादिगुणाः परमार्थतो भिन्ना एव पाकादिरूपं न च रूपाद्यनुगतमितिप्रतीतेः नैवं यतो जाति
बाधकाभावात् नन्वेवोत्पादविनाशोसमवायस्य प्रतीयेते द्रुतिगुणकं तदनुत्पन्नत्वात् तथा चानुगतप्रत्ययानुरोधेन तत्रापि शु
क्लत्वादिजातिः लाघवात् तत्र वस्तुं केन इत्युपेपं एवं डंडतंडुलपाकादिष्वपि पाकत्वादिकं तथा तारत्वादिविरुद्धधर्माध्यासाद्वा
लवृद्धाद्युदीरितडित्थाद्यर्थेष्वपि बाल्याद्यवस्थापरिणतत्वानापरिमाणरूपविरुद्धधर्माध्यासाद्भिन्नेषु डित्थत्वादिकं जा
तिः सैव च डित्थादिपदशक्या एकत्वादित्यं शौकर्यम् एतेन बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भि
द्यमाने डित्थाद्यर्थे वा डित्थादित्वमस्ती व्याख्यातं द्रव्यार्थेन वा शब्देन च शब्दस्य रत्वान्न विनिगमयातं यदा सर्वे च वाक्येषु

का॰प्र॰
२

सामान्यमस्तीत्यत्र तद्वाक्यतात्पर्यं अथवा भाष्यकारमतेडित्थादिवद् एवोपाधिरिति तन्मतेपि भावरूपनानात्वान्निछाना
ति रेव शक्यांशी कार्यमिति तन्मतेपि तस्मात्सर्वभावानां जातिरेव संकेतविषय इत्याहुः । येषां मते संज्ञाशब्दानां यादृच्छिकोपाधिः
किं तत्तद्धर्मिमात्रमपीति तेषां मते आकाशादिशब्दानां कथं ज्ञातो संकेत इति चिंत्यं । नैयायिकादयस्तु न व्यक्तिमात्रे शक्तिः
न वा जातिमात्रे आद्ये आनंत्याद्व्यभिचाराच्च । अंत्ये व्यक्तिप्रतीत्यभावप्रसंगात् न चाक्षेपाद्व्यक्तिप्रतीतिः तस्माद्विशिष्ट एव संके
तः न चानंत्यादशक्यता अभिव्योवांगोत्वादिसामान्यलक्षणया सर्वव्यक्तीनामुपस्थितो सर्वत्र संकेतग्रहसौकर्यादित्या
तिहद्वैतेषां गतास्तु व्यक्तावानंत्यादिदोषाज्जातावस्य च देशकालाननुगमाभावात्तदनुगतायां मतभ्यां हि तो संकेत इत्यादिमतानि
प्रकृतानुपयोगान्नस्तु त्रके तादर्शितानि ननु वाच्यलक्ष्यव्यंग्याः पदार्था इति विभागोऽनुपपन्नः मुख्यत्वेन प्रसिद्धस्य कुरी
यस्यापि भावादित्यत आह स मुख्योर्थः । साक्षात्संकेतितस्वार्थे मुख्यत्वेन प्रसिद्ध इत्यर्थः । कुतस्तत्वमत आह तत्र मुख्यो
व्यापारोस्याभिधोच्यते अस्य शब्दस्य तत्रार्थे योभिधारूपो व्यापारः स मुख्योयत उच्यते इत्यर्थः । ह्याभिधाव्यापारस्य
नाभिधायामनपायाभावादित्याशयः दर्शितानां लक्षयतीति तत्र मुख्य इत्यादि तत्र यो व्यापारः सोभिधेत्य न तत्स्वार्थः मुख्यत्वो कीर्त्ति
तं च वक्ष्यमाणलक्षणार्थ्यास्तद्वाधधुरः स रलस्योपपन्नपर्यनुमुख्यार्थबाधे तद्योग इत्यादिकारिकोपयुक्ततया वाच्य

द्वि
राम
२

स्वहस्तेनांतरं करोतीत्युत्क्रम इत्यादीनि सूत्रावतारणेन तदुक्तं · वाच्यार्थबाधे तद्योगे इत्येवमेवतत्रोपपन्नो संज्ञां न स्वकरणस्य योगे रवे
णनेति विस्तारितं वाचकं निरूप्य लाक्षणिकं लक्षयति लक्षणं लक्षयति मुख्यार्थबाधे तद्योगे रूढितोथ प्रयोजनात् अन्योर्थो
लक्ष्यते यत्सा लक्षणारोपिता क्रिया रूढि: प्रसिद्धि: प्रयोजनं कंचनार्थं प्रतिपादयितुं · क्रिया व्यापार: अन्यार्थो मुख्यार्थ पदार्थ लक्ष्यते सा
लक्षणेति लक्षणं लक्ष्यते प्रतिपाद्यते इत्यर्थो तेनात्मामयः मुख्यार्थबाध: शक्यतत्संबंधो रूढिप्रयोजनान्यतरत्त्वेति हेतुत्रयवच
नेनांजनायां शक्तिः स्फुटैवाति व्याप्तिवारणाय तद्योग इति लाक्षणिकेपि प्रवेशनीयं योगस्य च हेतुत्वे विवक्षितत्वमतो न मुख्यार्थसंबंधि
कंजनाया नव्याप्ति व्याप्तिः मुख्यस्याभिधारूपमुख्यार्थसंबंधेन प्रतिपादनेन भवतीति तद्वारणाय तदुक्तं · अन्यो मुख्य: प
दिति गुणीभूतलक्षणा क्रियामात्र परामर्श: तेन वाक्यसंबंधेनावाक्यप्रतिपत्तिर्लक्षणेति प्राचीनमते नेतदुक्तं तदेतावाक्य
संबंधो लक्षणेति परमार्थ: प्रतिपत्तिहेतुर्हि शक्तिर्न तु प्रतिपत्तिरेव यत्तु पदिस्य स्यायत्तदर्थकतया संबंधपरतयैव सूत्रव्या
ख्यानं तदयुक्तं नाभिधानस्यभावाद्धेतुभावान्न लक्षणा इत्यत्र मुख्यार्थबाधादित्रयं हेतुः प्रतिव्याख्यानविरोधात्तेन हि
संबंधरूपत्वे लक्षणाया: संबंधो हेतुर्वक्तव्यः तेन नु प्रतिपादनं वेल्ल लक्षणानत हि शब्दधर्म: गंगादिशब्दानां नीरादिकमुपस्था
प्यवितानिनीरादार्थेनैव संबंधेन तीराद्यर्थप्रतिपादना [illegible] स्य स्वपदेन संबंधविरहात् तत आह आरोपितेति क्रियेति श

का०प्र०
१०

र

कव्यवहितत्वस्यार्थविषयत्वाच्छब्दे आरोपितस्वसव्यापारो घस्त तोये निष्ठ एवेत्यर्थात् देतदुक्तं संतरार्थनिष्ठ इति सीलो
मपाकमिणा कुशल इत्यादौ अत्र दर्भग्रहणायोग्यत्वान्मुख्यार्थबाधः विवेचकत्वं च संबंधः। एवमन्यत्राप्यूह्यं तथा चैते लक्षणा द्विजन
पदशक्यार्जने त्वकुशब्दस्य व शक्तिर्यैप्रयोजनाभावात् गंगायां घोष इत्यादौ अत्र हि गंगातीरे घोष इति मुख्यशब्दाभिधानं प्राप्त पाव
नत्वं न प्रतीयते। यो गंगायां घोष इति लाक्षणिकात्तु लक्षणा तावत् द्विविधा शुद्धा गौणी च तत्राद्या द्विविधा उपादानल
क्षणा लक्षणलक्षणा च। ते अपि प्रत्येकं सारोपा साध्यवसाना चेति द्विविधे इति शुद्धाभेदाश्चत्वारः। गौणी तु द्विधा सारोपा सा
ध्यवसाना चेति षड्विधत्वं लक्षणायाः कारिकात्रयेण प्रतिपादयति स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणं उपादानं लक्ष
णं चेत्युक्ता शुद्धैव सा द्विधा। स्वसिद्धये स्वार्थस्यान्वयप्रवेशसिद्धये पराक्षेपः परलक्षणं स्वार्थापरित्यागेन परार्थलक्ष
णमुपादानमित्यर्थः। अतः काकेभ्यो दधि रक्ष्यतामित्यत्र नित्यस्पन्दनीयमेदले। एवं परार्थं स्वसमर्पणं परस्यान्वयप्रवेशसिद्ध
ये स्वसमर्पणं स्वार्थसमर्पणं स्वार्थपरित्यागः स्वार्थपरित्यागेन परार्थलक्षणं लक्षणमित्यर्थः एताभ्यामुपाधिभ्यां
शुद्धैव द्विविधा उक्ता न तु गौण्यपीत्यर्थः एते एवान्यत्राजहत्स्वार्था जहत्स्वार्थे इति उच्येते। ननु शुद्धैवेत्युपपन्नं गौ
णापि तथात्वसंभवात्। तथाहि गौर्वाहीक इत्यादौ लक्षणलक्षणा तावत्सुप्रदैव उपादानलक्षणा तु गौर्वाही

राम
१०

२१

कोऽन्यविषये गाव एते समानीयंतामित्यादाविति चेत्· अत्रोपचारबीजं संबंधः सादृश्यमन्यो वा· आद्ये शक्यसादृश्यस्य शे
क्यावृत्तित्वात् कथं शक्यस्यापि लक्ष्यता· येनोपादानलक्षणा स्यात्· अंते कथं गौणी सादृश्यसंबंधप्रयुक्तलक्षणाया एव
गौणीत्वात्· नत्रोपादानलक्षणान्यथा· कुंताः प्रविशंतीति यष्टीः प्रवेशयेत्यादौ· अत्र केचित् कुंतादयः स्वतोऽसंभवत्प्रवेशास्तत्सिद्धये
स्वसंयोगिपुरुषान् लक्षयंति· यथा काकेभ्यो दधि रक्ष्यतामित्यादि संग्रहस्तत्र योक्तं· अन्ये पुनर्जातिपदार्थवादिन उपादानल
क्षणामन्यामुदाहरंति· यथा गौरनुबंध्य इति श्रुत्या प्रतिपादितमनुबंधनं गोपदार्थस्य जातेरसंभवद्यस्मादिति जात्या अवच्छेदक
तया कथंचित्त्वान्वयसिद्धये व्यक्तिर्लक्ष्यते· ननु व्यक्तिरभिधेयैव· न तु लक्ष्येति चेत् न अन्ततो केवलायामेवाभिधा· जातिविशि
ष्टायां वा· आद्ये आनन्त्यव्यभिचारौ· अंते नागृहीतविशेषणान्यायेन जातावेवाभिधा व्यक्तिप्रतीतेराक्षेपादेव संभवात्· तदुक्तं वि
शेष्यं नाभिधा गच्छेत्क्षीणशक्तिर्विशेषणे इति· तदेतदपेशलं· प्रयोजनस्य रूढेर्वाऽन्यतरस्य लक्षणाहेतोरभावात्· जातिव्यक्तिप
दार्थयोर्दासीन्येन हि लोकप्रसिद्धिमाश्रित्य रूढिर्विवादः कथं तर्हि भट्टमते व्यक्तिप्रतीतिः जात्या आक्षेपात्· व्यक्तिं विना तस्या अभावा
त्· यथा क्रियतामित्यत्र क्रियया कर्त्रा कुर्वित्यत्र कर्मणा· अपरे त्वपीनो देवदत्तो दिवा न भुंक्ते इति वाक्यमभोजी पीन इति वत् पीनत्वो
पपत्तये प्रयोजकस्य भोजिनस्याप्रतीयमानस्याप्यलाभमलभमानं अन्वयं न बोधयति· तेन तत्सिद्धये रात्रिभोजनं लक्ष्यते· तथा च दिवा न भुं

कृ इति मुख्यमर्थमादायैव तल्लक्षणोऽस्तु उपादानलक्षणेयमित्यूहुः तदयमस्य कर्शाद्याध्याहारनयेक्षतानाश्रीयन्ते रथाध्याहारनयेक्ष भी
पन्ने रैवरात्रिभोजनप्रत्यये लक्षणानं गीकारात् तल्लक्षणा लक्षणालक्षणा गंगायां घोष इत्यादौ· अत्र तटादेर्बाधिकरणत्वसिद्धये गंगादि
शब्दाः स्वार्थमर्पयंति· स्वार्थपरित्यागं तत्रैव वर्त्तते उभयरूपा चेयं उदाहृता शुद्धा· न तु गौणी· उपचारमिश्रा हि गौणी उच्यते· उप
चारश्च सादृश्यसंबंधेन प्रवृत्तिः सादृश्यातिशयमहिम्ना भिन्नयोर्भेदप्रतीतिस्थगनं वा· न चैतत्कृयोस्तत्संभवः केवलु नरा वक्ष्यते
उपचारामिश्रत्वेन शुद्धा या भिन्नातो भेदके किं तत्र तटस्थत्वं· तत्र लक्षकस्य मुख्यार्थस्य लक्ष्यस्य च भेदप्रतीतिः यथा हि· गोर्वा
हीकोऽगोरूपमित्यादौ भेदेऽपि वाच्यलक्ष्ययोरभेदः प्रतीयते· ननु गंगायां घोष इत्यादौ तत्राभेदमात्रप्रतीतेरिति चेन्न गंगायां
घोषः षष्ठीः प्रवेशायेत्य न योरेव परस्परभेदहेतुस्तटस्थत्वं· गंगायामित्यत्र तत्त्वात्· घटीरित्यत्र तद्भावादिति मन्यते· तन्तु
यन्न पतते· अस्मिन्हि गंगादिपदे स्त्रीरादिप्रतिपादने गंगादिनिष्ठपावनत्वादिरूपप्रतिपिपादयिषितप्रत्ययः तत्र गंगात्वादिप्रती
तिरेवं बीजं· न तु तीरत्वादिप्रतीतिरेव· तीरेघोषत्व आपिततती प्रसंगात्· अथ गंगाशब्देन तटप्रतिपादने गंगासंबंधस्तत्र प्र
तीयते· तदेव च तद्बीजमिति वेन्न· एवं हि गंगातटे घोष इति मुख्यशब्दप्रयोगेऽपि तत्प्रतीतिः स्यात् तत्त्वसंबंधप्रतीतेर्विशेषाभावा
त्· अथ बाधे जागरूके गंगाशब्दादिभिर्गंगात्वादिकं तीरे बोध्यत इति चेन्न· उच्यते· शब्देन लक्ष्ये धर्मप्रतिपादिते तत्र मु

ति

तत
प

रूढाभेदोऽभ्यंजनया प्रतिपाद्यते ॰ तदेतदुक्तं ॰ तटादीनां गंगादिशब्दैः प्रतिपादने तत्त्वप्रतीतौ प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः इति अत्र प्रतिपाद्य
ने इति सति सम्यक्प्रत्ययस्यानंतर्यं बोध्यते न व्यंजने बाधः प्रतिबंधक इति का अविदांपर्यवस्यति हि सारोपसाध्यवसानयोः गौर्यो भेदयोर्भे
देऽप्यभेदावगमः सर्वथैवाभेदप्रतीतिः अफलमिति ॰ किं बहुना बाधित एवपावनत्वादिविशिष्टस्तटादेः प्रतीयते ॰ यतस्तत्रपिपिव्यति ॰ योगः फलेन
नो इति ॰ न चैवं कथं गौणापातिवाभेदप्रत्ययप्रयोजनं वक्ष्यतीति अशुद्धे भेदयोस्तत्प्रयोजनांतरमिति चेत् न ॰ गौणपातन्नात्मस्य प्रयोजनत्वात् ॰ अ
भेदयोस्तत्तु तत्प्रयोजनांतरस्याविर्भावात् ॰ ननु अशुद्धायामभेदप्रत्ययस्याभावादिति संक्षेपः गौणी भेदौ लक्षणान्तेव विभजते सारोपाऽ
न्या च ॥ ऽत्रौ केचिद्विषयी विषयस्तथा ॰ अन्या ॰ अध्यासित्वीणी आरोपाध्यवसानाभ्यां निद्यते ॰ न तत्पादाने लक्षणान्यामिति तदुक्तं शब्दार्थः विषयी
आरोप्यमाणो गवादिः विषयः आरोपस्यवाहीकादिः अनपन्हुत तथापि अनपन्हुतभेदौ सामानाधिकरण्येन तौ शब्दप्रतिपाद्यौ सा लक्षणा
सारोपा ॰ विषयविषयिणोः भेदेनोपन्यासस्यारोपपदार्थत्वात् विषयस्य अन्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ॰ विषयिणा आरोप्य
माणेन अन्यस्मिन् आरोपविषये अंतःकृते निगीर्णे भेदेनानुपस्थिते इति यावत् ॰ विषयिमात्रमत्र निर्दिश्यते न तु विषयोऽपि ॰ साध्यव
साना ॰ विषयिणा विषयनिरोभावस्याध्यवसानपदार्थत्वात् एतौ भेदौ शुद्धाभेदेऽपि भवत इति प्रतिपादयन् शुद्धायां गौणीभेदा अ
त्र लक्षणा माहात्म्य भेदाविमौ च सादृश्यात् संबंधांतरसत्त्वयोगे गौणे शुद्धौ च विज्ञेयौ ॥ ३ ॥ आरोपाध्यवसानरूपौ भेदौ यदि सादृश्यसं

सा

का०प्र०
१२

संबंधान्तराद्गौणौ· अथ संबंधान्तराद्रूढौ· तत्र सादृश्यापाधया· गौर्वाहीक इति सारोपः गौरयमिति साध्यवसानः यद्यपि वाहीकस्य वा
हीकत्वेन इदंतया वा उपस्थितौ सारोपलक्षणैकविते तथापीदंत्वस्यारोप्यविशेषणतया तद्रूपस्तं भूयते· अत एव वक्ष्यति अत्र निश्चय
रूपसंकरणवर्तनेनयनानेदृष्टाधीदोषविनमेतत्समीदित्। यत्र एतदिति बिंबविशेषस्तत्र किं नियमति शायोक्तिः किंवा एतदिति वक्त्रं नि
र्दिश्यपविंबाम सारोपा रूपकमिति। अत्र केचित्· गोशब्दस्य मुख्यतो तावत्प्रवृत्तिनिमित्तं· लक्षणया तु गोपदवाच्यगतं जाड्यमांद्या
दितत्त्वाम्भवती ति गोशब्देन जाड्यत्वेनस्वरूपेण वाहीक उच्यते· तदुक्तं· अथ शक्यस्य शाक्यवृत्ते प्रवृत्तिनिमित्तत्वात्· शक्यते श
क्यवृत्तित्वेस्वाभिन्न शक्यान्नविकरणत्वस्यत त्वात्· अपरे त नगवादिशब्देन वाहीकादिः प्रतिपाद्यते· किं तु गवादिगतस्य जाड्या
गुणस्याभिन्नतया वाहीकादिगतजाड्यमान्द्यादयो गुणा एव लक्ष्यंते इत्याहुः तदसम्यक्· गौर्वाहीक इत्यादि सामानाधिकरण्यानु
पपत्तेः इदं पुनरत्र तत्त्वं· साधारणजाड्यमांद्यादिलक्ष्यतावच्छेदकमाश्रित्य वाहीकादिर्लक्ष्यत इति· तेन गौर्वाहीक इत्यादि वाक्या
द्बोधो भवति· तदुक्तमन्यत्र· अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते· लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता इति· लक्ष्यमा
णगुणैरिति लक्ष्यमाणा ये गुणा जाड्यमान्द्यादयस्तैरेव यदि योगः शक्यसंबंधस्तदा गौणी वृत्तिरिति· अविनाभावश्चात्र संबंधमात्रमभि
मतं· न तु व्याप्तिः· संबंधात् क्रोशतीत्यादावभावात्· इत्याविशेषविशिष्टस्य तत्रापि सास्येवेति चेत्· तर्हि व्याप्तेः पादेव व्यापकप्रतीतिर

राम
१२

स्त किंल क्षणा येत्युक्तं गौरनुबंध्य इत्यत्र संबंधांतरात् सारोपो यथा आयुर्घृतमिति साध्यवसानो यथा आयुरेवेदमिति एवमादौ सा
दृश्याद्न्योन्यः कार्यकारणभावादिः संबंधस्तत्र्व के आरोपाध्यवसाने अत्र गौणाभेदे सारोपे भेदे पितादृश्यप्रतीतिः साध्यवसाने तु
सर्वथैवाभेदावगमः प्रयोजनं शुद्धभेदे सारोपे अन्यवैलक्षण्येन कार्यकारित्वादेः साध्यवसाने त्वव्यभिचारेण कार्यकारित्वादेः
प्रतीतिः फलं तदुभयं वा भेदप्रतीतिपूर्वकमित्युक्तं क्वचित्प्रयोजकत्वेनोपचारः यथा इंद्रार्था स्थूणा इंद्रः क्वचित्स्वस्वामिभावात्
यथा राजकीयः पुरुषो राजा क्वचिदवयवावयविभावात् यथा करमिधाग्ये अग्रहस्तइत्यत्राग्रमात्रे हस्तोपचारः क्वचित्तादर्थ
कर्मशालित्वात् यथा अतक्षा तक्षा लक्षणा तेन षड्विधा उपादानलक्षणारूपं भेदद्वयं तयोः सह लक्षितप्रयोजनानामभेदे संभव
त्यपि नते विभाजकत्वेनोक्ते किं तु हेतुत्वेनेति न तत्कृतो भेदो गणितः अत एव पश्चात् व्यंग्येन रहितेत्यादिना तत्कृतं भेदं दर्शयि
ष्यति अन्यथा पौनरुक्त्यप्रसंगात् एवं यथोक्तव्याख्यानेन षड्विधत्वे निर्दिष्टे मत्तषड्विधेति रूढिप्रयोजनोपादानलक्षणारोपाध्य
सानरूपैः षड्विधरूपाभिः कस्यिनाविधाः प्रकाराः यस्याः इति षड्विधेति केचिद्व्याख्यानं तत्र शुद्धैव साद्विधा सारोपाध्यवसितिः ए
वं शब्दयो गौणलो चनत्विं भिन्नत्वात् अनादेयं एवमारोपादिकृतं प्रकारद्वयं प्रतिपाद्य अन्यकृतं प्रकारत्रयमाह व्यंग्येन रहिता
रूढौ सहिता तु प्रयोजने लक्षणा समनुवर्त्तते रूढिप्रयोजनस्थले कथं व्यंग्यसाहित्यमिति चेत् प्रयोजनस्य व्यंजनमात्रगम्य

न

नि

25

काव्यप्र०
१३

त्वात्. तदिदमुक्तं प्रयोजने हि व्यंजनव्यापारगम्यमेवेति तैयत्तु. ननु लक्ष्यप्रयोजनयोर्द्वयोरपि लक्षणयैव प्रतीतौ किमत्र व्यंजन
येत्यत आह प्रयोजनेन हीति इतित सूक्तिमुक्तावतारणां तदर्शानविजृंभितं अत्र व्यंजनस्थापनस्याप्रसक्तत्वात् तत्स्वरूपमेव व्यंजनाभा
परात्रिधेति सूत्रे शेषव प्रतिपादनात् तेन गूढमगूढं वा तदिति व्यंग्यं लक्षणाभेदप्रयोजकस्यारोपादिर्यथाभिधेयतत्त्वात् तत्प्रयो
जकं व्यंग्यमपीति चस्यार्थः। वाच्यत्वः सहृदये काव्यभावनापरिपक्वबुद्धिः सहृदयस्तन्मात्रवेद्यं गूढं तदितरवेद्यमगूढं तत्र गूढं य
था मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः। उरो मुकुलितस्तनं जघनमंसबंधोद्धुरं
वतेंदुवदनातनौ तरुणिमोद्गमो मोदते। अत्र विकासः पुष्पधर्मः स्मितेऽनुपपन्न इति प्रसक्तत्वं लक्ष्यता विकसितपदेन लोकोत्तरर
मणीयतातिशयो व्यज्यते स वर्गतः एवं वशितसमुच्छलितापास्तसंस्थामुकुलितोद्धुरमोदतेशब्दैः स्वार्थत्वे लक्षितत्वानेक
विषयसंचारित्वोद्भिन्नत्वयोग्यत्वानियंत्रितत्वानि लक्ष्यपञ्चिर्गुत्वानुरागित्वसकलवशीकारित्वानुरागातिशयालिंगनयोग्य
त्वरमणीयत्वस्य हरणीयत्वानि गूढानि व्यज्यंते यथागाममर्थचकोरीयांडित्यमलिनयति दृगंगिमहिमा हिमांशोरद्वैतं कवलय
तिवक्त्रं मृगदृशः तमो वैदग्ध्यानिस्थगयति कचः किं च वचनं कुहूकंठीकंठध्वनिमधुरिमाणं तिरयति। अत्र क्रियापदानां स्वात्से
तिकविद्यायत्वादिव्यंग्यपालिगूढानि अगूढं यथा श्रीपरिचयाज्जडा अपि भवंत्यभिज्ञाविदग्धचरितानां उपदिशति कामि नम

१३

नीनांधो वनमदएवलितानि· अन्योपदेशकत्वेथ द्विविशेषप्रयोक्तत्वं मदेऽनुपपन्नमित्यादि मुख्यार्थं लक्षयता उपादयति पदे
न अनायासेन शिक्षाया नमभिव्यज्यते· तथा सत हृदयात हृदययोरुभयोरप्यभिधेयवत्प्रकाशते· तदेषा कथिता त्रिधा· तत्र स्मा
त· त्रिधा अव्यंग्यात् दव्यंग्या अगूढव्यंग्या चेति· एवं लक्षणां निरूप्य तया लाक्षणिकं लक्षयति· तद्भूर्लाक्षणिकः स्याद्वचको ला
क्षणिक इति सूत्रस्थः शब्दस्तु अनुषज्यते· तद्भूः तस्याः लक्षणाया आश्रयः ...यं अजकरा व लक्षणायां व्यंजना निरूपणीया· सा च
द्वेधा· शब्दनिष्ठा अर्थनिष्ठा च तत्रात्यायाः शब्दलक्षणे अनुपयुक्तत्वात्ते विवेचनीयाः आद्या द्विधा अभिधामूला लक्षणामूला च
तत्र यद्यपि अभिधायाः प्राथम्यादुपजीव्यत्वाच्च तन्मूलाम्प्रथमं निरूपयितुमुचिता तथापि प्रसिद्धत्वात् लक्षणायाः प्रकृत
त्वाच्च तन्मूलामेव प्रथमं निरूपयति तत्र व्यापारो व्यंजनात्मकः तत्र लाक्षणिकशब्दे व्यापारो व्यंग्यप्रकाशनानुकूलः लक्षणादिनै
व न स्वतीतो किंतु येन तत् आह यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते फले शब्दैकगम्येऽत्र व्यंजनान्नापरा क्रिया यस्य पाव न
त्वादेः फलस्य प्रतीतये लक्षणा आश्रयशब्दप्रयोगः तत्फलं तस्मादेव शब्दाद्गम्यते न त्वन्यप्रमाणांतरात्· व्याप्तिस्मृत्यादेरनपेक्षणा
त्· न च तत्र शब्दस्य व्यंजनं विना अन्या क्रिया व्यापारः। तथाहि नाभिधा समयाभावात्· पावनत्वादेः फले संकेतग्रहाभावात्·
अभिधाहि संकेतग्रहसहायैवोपयुज्यते· न स्वरूपसतीति वक्ष्यते हेत्वभावान्न लक्षणा मुख्यार्थबाधस्तद्योगो रूढिप्रयोजनान्यत

27

का॰ प्र॰
१४

तटस्थितित्रये लक्षणाहेतुः तदभावे नैवोपपादयति॰ लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो न प्रयोजनमेतस्मिन् न च शब्दः
स्खलद्गतिः यथा गंगायां घोष इत्यत्र तीरं मुख्योऽर्थः तत्र च बाधः तीरेण तत्संबंधः तीरस्य च लक्षणायामपेक्षायामुपस्थापने मुख्यशब्देन प्रतिपादयि
तुमशक्यस्य पावनत्वादेः प्रतीतिश्च प्रयोजनमिति गंगाशब्देन तटं लक्ष्यते॰ तद्बुद्धितटमपि मुख्यं स्यात् तत्र च बाधो भवेत् प्रयो
जनस्य च गंगादितटपावनत्वादिविशेषस्य तटेन संबंधः स्यात् लक्षणायाः प्रयोजनप्रतिपादनस्य च प्रयोजनांतरं स भवेत्
तदा गंगायां घोषः प्रयोजनेन लक्षयेत्॰ न चैतदेकमप्यत्रेत्यर्थः न केवलं मुख्यार्थबाधादीनामभावमात्रं किं तु तेषामपेक्षापि नेत्या
ह॰ न च शब्दः स्खलद्गतिरिति॰ मुख्यार्थबाधादित्रयमपेक्ष्य बोधकत्वं स्खलद्गतित्वं॰ एवं च गंगाशब्दस्तटमिव प्रयोजनं प्र
तिपादयितुमसमर्थ इत्यादिरीत्या बाधादिकमनपेक्ष्येति शेषो द्रष्टव्यः समर्थ इति बाधादित्रयमपेक्ष्यैवेति शेषः न ना
स्ति प्रयोजनेऽपि लक्ष्ये प्रयोजनांतरमिति वेधा साधयितुमशक्याऽत्राह एवमप्यनवस्था स्याद्या मूलक्षयकारिणी॰ मूलं प्रकृतार्थ
प्रतीतिः ननु पावनत्वादिविशिष्टमेव तीरं लक्ष्यतामिति किं प्रयोजनया॰ न चैवं प्रयोजनस्यापि लक्ष्यकोटिप्रवेशात् लक्षणा
प्रयोजनेनास्तीति वाच्यं॰ गंगातटे घोष इत्यतोऽधिकस्यार्थस्य पावनत्वादिविशिष्टस्य प्रतीतेरेव प्रयोजनत्वादित्यत आ
ह॰ प्रयोजनेन सहितं लक्षणीयं न युज्यते॰ कुत इत्याकांक्षायामाह॰ ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतं ननु विषय

राम
१४

फलयोर्भेद इति सूत्रार्थः स गायुक्तः फलत्वं हि जन्यत्वं वा जन्यप्रतीतिविषयत्वं वा । आद्ये पाकजत्वादौ तदभावः तज्ज्ञाने विषया
द्भेदस्व । अंत्ये प्रत्यक्षादेर्नीलादिर्विषयः फलं न प्रकटतासंविन्निर्वेति शक्तिविशेषः प्रकटता ज्ञानस्य प्रत्यक्षजन्यत्वाभावात् ।
नच जन्यज्ञाप्यसाधारणमेकं साध्यत्वमस्तीति । अत्र ब्रूमः ज्ञानस्य जनकीभूतो विषयो यथा ज्ञानादन्यः तथा फलमपि तस्य
स्वतो भिन्नं कारणस्येव कार्यस्यापि भिन्नकालत्वनियमात् । शेषादौ तु क्वचित्फलपदमौपचारिकं दृश्यते तथा च लक्ष्य
ज्ञानमेव पदिशेषस्य ज्ञानेन तदाप्रयोजनं स्यादिति भावः । ननु लक्ष्यप्रतीतिर्न शेषप्रतीतिः फलं । किं तु शाक्यसंबंधरूपल
क्षणायाः तथा च न किंचिद्दूषणमिति चेत् उक्तं यथाश्रुतेवंडीदासेन । ज्ञानस्य विषयातिरिक्तं फलमात्रं गविवक्षितं ते
यगतं वा । आद्ये प्रकृते ध्वस्ति गौ स्वामिगतप्रीतिः अंत्ये प्रयोजनज्ञाने एव व्यभिचारः तेन हि गौ स्वामिसंतोषमात्रं जन्यते नत
त्प्रतीतं किंचिदिति । तस्माद्धेतुफलयोस्तत्प्रतीतिफलप्रतीत्योर्भिन्नकालत्वेनाभिन्नव्यापारविषयत्वमसंभवीति न भेद इति ध्येय
नासिद्धिरित्यत्रात्मयोमिति । तदवोधविजृंभितं न यनेन सूत्रेण यथाश्रुतेनापि ज्ञानत्वस्य विषयान्यफलत्वव्याप्यत्वं प्रति
पाद्यते किंतु ज्ञानफलत्वस्य विषयान्यत्वव्याप्यत्वं । तथा च वेशे प्रादे लक्षणा जन्यप्रतीतिविषयत्वेन त्वप्रयोजनेनस्यादि
त्यर्थे दोषानवकाशः॥ कश्चित्तु ननु केनोच्यते तत्फलमिति । किंतु विशिष्टलक्षणातो विशिष्टप्रतीतिरिति तत्रा हुः अन्व

का०प्र०
१५
विषयी

पानुपपत्त्या हि लक्षणा प्रसरंती यावदन्वयोपपादकं तावदेव विषयीकरोति न त्वनुपपादकमपीति किंचांतरे पावनत्वम
पि कुर्यात· नन्वन्यथानुपपत्त्या कल्प्यमाना पि सानुदृश्यमपि शैत्यं विषयीकरोति यथा तात्पर्यशमायोपादीयमानमेवं दन्नं शैत्यम
मपि जनयतीति चेत न· एवं हि नस्पर्शेन्द्रियमात्रेण शैत्यजनकत्वं· लक्षणया त्वनुपपत्तिप्रसारितयेति वैषम्यात् वयं ब्रूमः
विशिष्टं लक्ष्यं न तदा भवेत· यदि विशिष्टत्वं लक्ष्यतावच्छेदकं पूर्वमप्रतीतं संभवेत· न त्वेवं पावनत्वादिविशेषवैशिष्ट्यस्य लक्ष्ये
प्रमाणांतरागोचरत्वात· तत्र तस्याभावात· यदुक्तं वा न योगः फलेन नो इति· अथ पावनत्वादिसामान्यवैशिष्ट्यमेव ल
क्ष्यतावच्छेदकमस्तु· तस्य प्रतीतत्वादिति चेत्तर्हि पावनत्वादिविशेषो न प्रतीयेतेति किं बहुना· गोवीहीकादेस्तत्र गवाभि
न्न जन्यस्य लक्ष्यत्वे सैवान्वयानुपपत्तिः उपसंहरति विशिष्टे लक्षणा नैवं· एवं उक्तयुक्त्या कथं तर्हि तत्प्रतीतिरित्य
त आह विशेषास्तु उक्त लक्षिते तटादौ लक्षिते सति पावनत्वादयो विशेषाः प्रतीतिविषयाः स्युः ते च प्रसिद्धाति रि
क्तव्यापारगम्या एव स च व्यापारो व्यंजनध्वननादिशब्दवाच्योऽवश्यमेषितव्यः कथमन्यथा विशेषप्रतीतिरिति
एवं लक्षणामूलं व्यंजकत्वमुक्तं· अभिधामूलं त्वाह अनेकार्थस्य शब्दस्य वाचकत्वे नियंत्रिते संयोगाद्यैरवाच्या

प

राम
२५

30

धीधीहेतुव्याप्ती रंजनं अनेकार्थस्य शब्दस्य वाचकत्वे संयोगाद्यैर्नियंत्रिते सति अवाच्यार्थधीहेतुर्व्यापारो रंजनं व्यं
जनमित्यर्थः अनेकार्थो ऽनेकाभिधानशक्तिः अर्थभेदेन शब्दभेद इति नयेनु अर्थीत सन्निधानशक्तेः शब्दस्य ह्यास्तदभेदन्नम
विषयो वा वाचकत्वमभिधा अवाच्यार्थस्तदाभिधाव्यापाराविषयः नियंत्रणं नियमनं एकतरमात्रस्मरणानुकूलत्वं यद
नुः शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव इति एतेन नियमनमेतस्मिन्नेवार्थे वक्तुः तात्पर्यमिति तात्पर्यग्रहस्य बोधप्रला
पः संयोगाद्यैरित्याद्यपदसंग्राह्यं विप्रयोगादि यदुक्तमभियुक्तैः संयोगो विप्रयोगश्च साहचर्यं विरोधिता अर्थः प्रकरणं लिंगं शब्दस्य
स्यान्यस्य संनिधिः सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव इति तत्र संयोगः प्रसिद्धा
र्थस्य गुणविशेषरूपः संबंधः तेनाभिधानियमनं यथा सशंखचक्रो हरिरित्यत्र शंखादिसंयोगेनानेकार्थस्य हरिशब्दस्य अ
च्युते ऽभिधा नियम्यते अन्यहरिपदार्थेन संयोगाभावात् विप्रयोगस्तादृशसंबंधध्वंसस्तेन यथा अशंखचक्रो हरिरि
त्यच्युते ध्वंसस्य प्रतियोगिपूर्वकत्वात् साहचर्यं सहचरता तेन यथा रामलक्ष्मणाविति रामपदस्य लक्ष्मणसाहचर्ये
ण दाशरथौ विरोधः सहानवस्थाने बध्यघातकभावश्च तेन यथा छायातपाविति कौ स्यादोराकृत्वे पि छायापदस्य

तथाभावे· विरोधिनोः कयोश्छिन्नत्वोपमायां रामार्जुनगतिस्तयोरित्यत्र रामार्जुनपदयोर्भार्गवकार्तवीर्ययोः ॥ अर्थः प्रयोज
नं· तेन यथा· स्थाणुं भज भवच्छिदे इत्यत्र भवच्छेदरूपप्रयोजनवशात् स्थाणुपदस्य महादेवे प्रकरणं वक्त्रोतृबुद्धिस्थता तेन
यथा· सर्वं जानाति देव इत्यत्र देवशब्दस्य राजनि· यत्तु युष्मदर्थे इति व्याख्यानं तस्यापि प्रकृते राजा द्यावित्यर्थः ॥ किंवा संबोध्ये
राजादावित्यर्थः संबोध्यस्यैव युष्मदर्थत्वात्· लिङ्गं संयोगादिति रिक्तसंबन्धेन परपक्षव्यावृत्तो धर्मः तेन यथा· कुपितो मकर
ध्वज इत्यत्र मकराकारध्वजसमुद्राभ्यां व्यावृत्तेन समवायसंबन्धवता कोपेन मकरध्वजशब्दस्य कामे यत्तु लिङ्गं चिह्नमिति· तन्न
।कोपस्य कामचिह्नत्वाभावात्· असाधारणधर्मस्य चिह्नत्वात्· सशङ्खचक्र इत्यत्रातिव्याप्तिप्रसंगाच्च· शब्दस्यान्यस्य
संनिधिः नियतार्थकशब्दान्तरसामानाधिकरण्यं अतो भवच्छिद इत्यादावप्रसंगः न च सशङ्खचक्रो हरिरित्यत्रातिव्याप्तिः
शङ्खचक्रसामानाधिकरण्याभावात् यद्वा· हरेः शङ्खचक्रे इति संयोगोदाहरणतान्यथैतेन यथा· देवस्य त्रिपुरारातेरि
त्यत्र त्रिपुरारातिशब्दसामानाधिकरण्याद्देवशब्दस्य शंभुरूपे अमरे· अन्यस्य देवशब्दार्थस्य राज्ञः त्रिपुरारातित्वाभा
वात्· यत्तु देवतान्तरस्यात्यथाभावात् शंभौ शक्तिनियमनमिति· तत्र युक्तं· देवतान्तरे देवशब्दस्य शक्तिभेदाद्वादुदाह

रणासामेव स्थापनैः सामर्थ्यं कारणत्वं। तेन यथा। मधुना मत्तः कोकिल इति। अत्र मधुशब्दस्य वसंते। अन्यस्य मधुशब्दार्थस्य कोकि-
लमादनासामर्थ्यात्। औचिती यथा। पातु वो दयितामुखमिति। अत्रौत्कंठितमनोरथसाधनौचित्येन मुखशब्दस्य
सांमुख्ये। न तु वदने। देशो यथा। अपि सामर्थ्ये संभवत्येवं यथा विमधुने सत्र लतीय यैवतद्बाधाभावे यो चितीमात्रज्ञानादेव स्फू-
र्त्यो प्रतिसंधाने पि शक्तिनियमनमसंकीर्णमिति। देशो यथा। भात्यत्र परमेश्वर इति। अत्र अत्रेति राजधानीरूपाद्देशात् परमे-
श्वरपदस्य राजनि। कालो यथा। चित्रभानुर्विभाती। अत्र चित्रभानुपदस्य दिवा दिवाकरे। रजन्यामाशुशुक्षणौ। काक्वादि लिंगं
पुंस्त्वादि। तद्यथा। मित्रं भातीति। अत्र नपुंसकरूपात् लिंगात् मित्रपदस्य सुहृदि। मित्रो भातीत्यत्र पुल्लिंगात् सूर्ये। स्वर-
स्तूदात्तादिर्वेद एव हेतुः स नार्थप्रतीतिकृत् तद्वयपते। यथा इंद्रशत्रो वर्धस्वेति। अत्रेंद्रशत्रो इंद्रस्यांतोदात्तत्वे इंद्रस्य शातयितेति
षष्ठीतत्पुरुषसमासे कृते। इंद्रस्य शातनकर्तृत्वं लभ्यते। पूर्वपदांतोदात्तत्वे च इंद्रः शातयिता यस्येति बहुव्रीहिलाभात् इंद्रस्य शा-
तनकर्तृत्वं लभ्यते। काव्ये तु नैवं बाहुल्यं। उक्तोनुसाराद्रूपस्वरेणाहि काव्येऽर्थविशेषावगतौ श्लेषभंगप्रसंगात्। अतए-
व श्लेषप्रस्तावे वक्ष्यति काव्यमार्गे स्वरो न गण्यत इत्यादि। ननु दृष्टे प्रसीदेत्यादौ स्वरेण संबोधनं प्रकाश्यते। तेनैवार्थविशे-

तुः

का०प्र०
१७

थेऽभिधा नियम्यते। न तु साक्षी त्वं रोषेव। काकुच्छलेन नानार्थाभिधानियमनं किं तु पदार्थस्यैवमं अतः। पद्मास्वरशब्देन उद्य
तादित्रयं विवक्षितं। अतः काव्ये स्वरस्याभिधानियामकत्वं नास्तीति अर्थबाहुल्येनेति विशेषणमिति। एवं सुधाकरसहृद
अंहृद्धिः पंकजवैरिणी सादाविंदुशत्रुरिति। न्यायेनाभिधानियमनस्य काव्येऽपि दुर्वारत्वात्। स्वरादय इत्यादिग्रहणात् अभि
नयापदेशोपगृह्यते। अन्ये तु क्रांतदर्शनाः। अभिनयश्च साक्षादिवार्थीकारादिप्रदर्शका हस्तादिक्रियातयापया एहहमेत्त थ
रिणाऽऽस्तां एहहमेत्ताहिं अच्छिवत्ताहिं। एहहमेत्तावत्थाए एहहमेत्तेहिं दिअहेहिं। अत्र विकसितमुकुलितानि नयविशेषसाहित्येन स
नस्य पीनत्वमुकुलितत्वाद्यर्थविशेषेऽभिधा नियम्यते। एवं शेषपादत्रयेऽपि। अपदेशोऽभिमतनिर्देशः। तेन यथा। इतः स
देसः प्राप्तश्रीर्नेत एवार्हति क्षयं। विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतं। अत्रापदेशेन हृद्देशावस्थाभिधावक्तरि निय
म्यते। इत्थं संयोगादिना अर्थांतराभिधायकत्वे निवारितेऽपि पदस्यानेकार्थस्य शब्दस्य नैकविदर्थांतरस्य प्रतिपादने। तत्र ना
भिधायास्य व्यापारः नियमितत्वात्तस्याः। नापि लक्षणायाः मुख्यार्थबाधादिविरहात्। किं तु अंजनमेव व्यापारः। यथा। भद्रात्म
नो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य। यस्यानुपप्लुतगतेः परवारणस्य दानांबुसेकसुभ

राम
८

गः स ततं करोभूत्। अत्र प्रकरणेनाभद्रात्मनहत्यादिपदानां राशितदन्वययोग्ये वाच्येऽभिधानियंत्रणेपि गजस्य तदन्वययोग्यस्य
वाच्यस्य व्यंजनयैव प्रतीतिः। न च नृपमानोपमेयभावकल्पनाविरहात्स्पष्टश्लेषतो भेदेपि योः सकलसरगोत्रारागामिसाधर्म्यश्लेषतः कु
तोस्य भेदः अर्थश्लेषे वोभयत्र शक्तिरेव न व्यंजनेति चेत्। उच्यते। यत्रोभयोरर्थयोः स्तात्पर्यं स श्लेषः यत्र त्वेकस्मिन्नेव तात्पर्यं सामग्री
महिम्ना तु द्वितीयार्थप्रतीतिः सा व्यंजनेति। एवं व्यंजनां निरूप्य तदाश्रयं लक्षयति। तद्युक्तो व्यंजकः शब्दः। व्यंजनमिति प्रस्तुते
पि अर्थगतत्वात् छब्देन व्यंजनं परामृश्यते। तेन व्यंजनयुक्तो व्यंजक इति संपद्यते। अन्यथा व्यंजनयुक्तो व्यंजक इति स्यात्। तदेत
दुक्तं व्यंजनयुक्तो व्यंजनयुक्तः। ननु कथं तर्हि अर्थस्य व्यंजकत्वे कथं शब्दार्थयुगलरूपस्य काव्यस्य ध्वनित्वं स्यात् इत्यत आ
ह यत्सोर्थान्तरयुक् तथा। अर्थोपि व्यंजकस्तत्र सहकारितया मतः। शब्द इति शब्दः तथा व्यंजकः॥ इति श्रीमहोपाध्याय श्रीगो
विंदकृते काव्यप्रदीपे काव्याधारीभूतशब्दार्थविभागो द्वितीय उल्लासः॥२॥ एवं शब्दे निरूपिते योद्धा तेन शब्दव्यंजनामाणि रूपि
तायां प्रसंगेनार्थव्यंजना निरूपणीया तत्रैत तदाशंक्योत। शब्दे निरूपिते अवसरोयमर्थनिरूपणस्य किंच अर्थधर्मिनि
रूपिते तद्धर्मो व्यंजनासु निरूपा भवति। तत्कुलस्मात्राद्दत्ताह व्यंजना निरूपणामिति। तदि नाशकांक्षिणिनी यन्नुक्तं स्मार

मासीत

का॰ प्र॰
१८

व्यंति॰ अर्थाः प्रोक्ताः पुरा तेषां अर्था वाच्यलक्ष्यव्यंग्याः। अर्थस्य संनिकृष्टतरत्वेपि तेषामित्यनेन योग्यतया वाचकादयः शब्दाः
परामृश्यंते शिष्यावधानाय प्रतिजानीते॰ अर्थो व्यंजकतोच्यते ननु सर्वेषामित्यादिना पूर्वमर्थो व्यंजकतया प्रोक्त एव॰ तदन्या
कीदृशी सेत्याकांक्षायामाह॰ वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषां
योर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा॥ बोद्धव्यः प्रतिपादनीयो जनः॥ अंतर्भावितण्यर्थोऽत्र॰ अतो न वाच्येनाभेदः। का
कुः शोकभीत्यादिभिर्ध्वनिविकारः। वाक्यवाच्याभ्यां सहितोऽन्यसन्निधिर्वाक्यवाच्यान्यसन्निधिः। अतो न द्वंद्व एकवद्भावेन पुं
स्त्वकल्पप्रसंगः। प्रस्तावः प्रकरणं॰ वैशिष्ट्यं वैलक्षण्यं॰ तच्च वक्त्रादिषु प्रत्येकमभिसंबध्यते॰ अन्योऽर्थो वाच्यलक्ष्यातिरिक्तः
व्यक्तिः संज्ञा॰ करणमुच्यते॥ अर्थस्य त्रिविधस्यापि न तु कस्यचिदेव॰ प्रतिभाजुषामित्यनेन नवनवोन्मेषशालिनी प्रज्ञा
प्रतिभा या वासनेत्युच्यते॰ तस्याः सत्त्वामेव वक्त्रादिवैशिष्ट्यादिसत्त्वेपि व्यंग्यप्रतीतिरिति प्रतिपादितं॰ अत एव वैयाकरणादीनां
न तथा रसप्रतीतिः तथा चोक्तं सवासनानां नाट्यादौ रसस्यानुभवो भवेत् निर्वासनास्तु रंगांतर्वेश्मकुड्याश्मसन्निभा इ
ति यथाक्रममुदाहरणानि अइपि दुल्लंजलकुंभं घेत्तूण समागदह्मि सहि तुरिअं। समसेअसलिलणीसासणीस

राम
१८

ई मात्सर्यं कुरुषु तु योग्यं ई

ह्रा वीसमामि खणं॰ अत्र वक्त्री कामिनी॰ तस्या दुःशीलत्वरूपवैशिष्ट्यं विजानतां बोध्योरतगोपनेच्छा भवतीत्यत्र शिष्टं दोषत्वं चिंत्या
मलसत्वसंगत्या सखि श्रम॰ मह मेरभाग्गणी एकैके रं सहिं विश्राम ह्यपरिहवई अत्र दूती प्रतिपाद्या तस्या अन्यदापि दृष्टदुष्टचेष्ट
या वैशिष्ट्येन तस्याः कामुकोपभोगो व्यज्यते॰ अत्रान्यदीयमुन्निद्रतादिकमन्यत्र बाधितमिति तत्त्वहृदयानुन्निद्रतादिकं लक्ष्य
तद्वृत्तिकेचित्॰ तदबोधात्॰ सख्याः स्वदीयोन्निद्रतान्वयस्यावाक्यार्थत्वात्॰ तथाभूतां दृष्ट्वा नृपसदसि पांचालतनयां वने व्या
धैः सार्द्धं सुचिरमुषितं वल्कलधरैः॰ विराटस्यावासे स्थितमनुचितारंभनिभृतं गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु
खेदो मात्सर्यं॰ अत्र खेदं मयि भजति नाद्यापि कुरुष्विति काकौ वैशिष्ट्यात् मयि न योग्यः मात्सर्यमिति व्यज्यते॰ ननु श्रोत्रे न
काकुव्यंग्येन वाच्यस्य सिद्धिः शोभनत्वनिष्पत्तिः क्रियते॰ तथा चापरांगतया व्यंग्यं गुणीभूतं अतो न ध्वन्यंगं काकुरिति चेत्॰
उक्तव्यंग्यस्याक्षोधत्र कर्षपर्यवसन्नतया वाच्यसिद्ध्यंगत्वात्॰ तदेतदुक्तं न च वाच्यसिद्ध्यंगमत्र काकुरिति गुणीभूतव्यंग्य
त्वशंका मितिः॰ न चापि काक्वाक्षिप्तव्यंग्यरूपगुणीभूतव्यंग्यप्रभेदता कथमयनेयेति चेत्॰ अत्र नेति प्रश्नकाक्वापि वा
क्यार्थप्रतीतिपर्यवसानात्॰ यां काकुं विना वाक्यार्थबोध एव नोपपद्यते तत्रैवाक्षिप्तस्य गुणीभावात्॰ यथा मथ्नामि कौर

का॰ प्र॰
१९

वशात्तं समरे नकोपादिस्यादौ भीमसेनादौ तादृशोक्कारितस्येतदुक्तं प्रथममात्रेणाविकाकोविदभ्रांतेरिति॰ अन्येन तु कुरु युन्मन्नमती तिमन्न
कोकुः किमर्थोन्ततः प्रश्नरूपः किमर्थ एव हठाक्षिप्र इति तस्यैव गुणीभावो न्यायः न तत्क्रमेणापि काकाकांगयोगुणीभूतो भव
ति॰ अत एव गुणीभूतविभागे काक्वाक्षिप्तमिति हठार्थगर्भाक्षिप्तपदप्रयोग इति तात्पर्यमाहुः तदस्या महं गंडस्थल स्त्रीमि अदि
ष्टिं रागलोसि अस्मतो॰ हरिदं संधे अअहं तेअ कवोलाणं ताहिद्विवाकामनेकपदं तेनात्र तदेशनीपदात्मक वाक्य वैशिष्ट्या
त मत्सरवी कपोलप्रतिबिंबितां पश्यतस्ते दृष्टिरन्यादृशी वलितायात तस्यां अन्यादृशी सहोपच्छन्नकामुकत्वं तवेति व्यज्यते॰
उद्देशोऽयं सरसकदली श्रेणिशोभातिशायी कुंजोत्कर्षांकुरितरमणीविभ्रमो नर्मदायाः किंचैतस्मिन् सुरतसुहृदस्तन्वि
ते वांतिवाता येषामग्रे सरति कलिताकांडकोपो मनोभूः॥ अत्र नर्मदोद्देशरूपस्य तद्विशेषणीभूतवातकुंजादिरूपस्य च वा
च्यस्य यथोक्तविशेषणस्य वैशिष्ट्यात् सुरतार्थं प्रविशेति व्यज्यते॰ णोल्लेइ अणोल्लमणा अत्ता मं घरभरंमि सअलंमि॰
खणमेत्तं जइ संझाए होइ ण वहोइ वीसामो॰ अन्यसंनिधिः संनिहितोऽन्यः तेनात्र प्रतिवेशिनी प्रति प्रवर्तिते वाक्ये प्रच्छन्न
पुरुषरूपस्यान्यस्य संनिधेर्वैशिष्ट्यात् संनिहितं प्रति संध्यासंकेतसमय इति व्यज्यते। एवं ईसमागमिस्साहित ज्ञापि

राम
१९

योऽस्मज्जपहरमेत्नेण एते अकिंचिद्विदूसितोहि सज्जेतु करिणा ऽत्रं अत्र प्रकरणस्य प्रस्तावस्याभिसारत्वं वंधितरूपवैशिष्ट्यात्
उपपत्तिं प्रसभिसन्तुं नयोग्यमितिव्यज्यते · अन्यत्र दद्यं कुसुमाव चायं कुरुध्वमत्रास्ति करोमि सख्यः नाहं विदूरं भ्रमितुं समर्था
प्रसीदता येऽचितोऽञ्जलिर्वः अत्र देशस्यातिविविक्तत्वादिरूपवैशिष्ट्यात् वक्तृवैशिष्ट्यादिसहितात् तस्याः प्रच्छन्नकामुकोऽपुष्पा
नि: प्रहे यदन्नियसखीः प्रतिव्यज्यते । गुरुजनस्य रावणस्यापि अकिं मरणं मित्रं हन्दभारस्य अहं अत्र ऽपवातं वसिष्यन्त्सम
ज्जेषु स्तनांसि करिणा ऽत्रं अत्रापयपदप्रतिपाद्यमधुसमयवैशिष्ट्यात् वक्तुरवस्थाविशेषसहितादिदानीं यदि व्रजसि तदा
अहं त्वामनुगमिष्यामि · तव तु न ज्ञातानि गतिमितिप्रियं प्रत्यनुरक्तयाभिव्यज्यते · आदिग्रहणात् चेष्टालीलादेः तत्र [illegible] चेष्टायथा · दा
रोपांतनिरंतरेऽर्पितयासौ दर्पसारश्रियापीवोल्लासो रुद्धुंगपरस्य रतसमासक्तसमासादितं · आनीतं पुरतः शिरोऽंशुकमधः
क्षिप्ते चलेलोचने वाचस्तत्र निवारितं प्रसरणं संकोचिते दोर्लते · अत्रोक्तसमासगादि चेष्टावैशिष्ट्यात् प्रच्छन्नकामुकविषय
श्रोत्कण्ठाविशेषो व्यज्यते · तत्र प्रथमार्धे नष्टष्टकमालिंगनं शिरोंशुकं पुरत आनीतमित्यनेन गूढमागं [illegible]
छे ति · अथः क्षिप्ते च लेलोचने वाचस्तत्र निवारितं प्रसरणमित्येताभ्यां सूर्यास्तमये कोलाहलरहिते काले स

का० प्र०
२०

मागंतव्यमिति । संकोचिते दोर्लते इत्यनेन पारितोषिकमालिंगनं करोमीति व्यज्यते । यद्यप्येकत्रैवोदाहरणे भेदांतराण्यपि
संतीति तदेवोदाहरणांतरं संभवति तथापि निःसंदेहमुक्तत्रयेणाभावसरतया पुनः पुनरुदाह्रियते । वक्तृबोद्धव्यादीनां प्रसे
कमेव न व्यंजकत्वं किंतु मिलितानामपीति द्रष्टव्यं । तत्र द्वयोर्व्यंजकत्वं यथा । अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोए
हि । मा पहिअ रत्तिअंधअ सेज्जाए मह णिमज्जहिसि । नन्वर्थमात्रे व्यंजकत्वे शब्दार्थयुगलरूपकाव्यस्य व्यंजकत्वं न सि
द्धमित्यत आह शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थांतरं यतः । अर्थस्य व्यंजकत्वे तच्छब्दस्य सहकारिता ॥ इति श्रीमहामहोपाध्या
यश्रीगोविंदठक्कुरकृते काव्यप्रदीपे अर्थव्यंजकतानिर्णयो नाम तृतीय उल्लासः ॥ यद्यपि काव्यलक्षणविभागे विधाय लक्षण
पदार्थेषु विवेचनीयेषु विशेष्यपदस्यार्थः शब्दार्थौ विचारितौ । इदानीं विशेषणपदार्थानां दोषगुणालंकाराणां निरूप
णमुचितं न तु काव्यभेदस्य ध्वन्यादेर्भेदानां । तथापि ध्वन्यादिभेदेषु ज्ञातेषु दोषादीनां हेयोपादेयतयोरवगमो भवति ।
तयोर्विशेषणच्छलात् । यथा श्रुतिकटुत्वं दोषो ध्वनिविशेषे शृंगारादिध्वनौ हेयो रौद्रादिरसध्वनौ चित्रभेदे वाऽहेय एव
माधुर्यादिर्गुणाः शृंगारादिध्वनावुपादेयो रौद्रादिरसध्वनौ त्वनुपादेय एव । अलंकारो यमकादी रसादिध्वनावनुपा

श्री

राम
२०

देयः चित्रभेदेन्तूपादेय एव तथा च दोषादिनिरूपणोपयोगिषु काव्यविशेषप्रभेदेषु निरूप्यमाणेषु प्रसंगादनुपयोगिनोपि निरूप-
णीयाः स्युः अस्तु त्रयेणापि काव्यभेदत्रयभेदो निरूपणीयः । तत्र प्रथमं तु ध्वनिभेदाः तत्र तावत् ध्वनिर्द्विधा । अविवक्षितवाच्यो विवक्षितान्य-
परवाच्यश्च । तत्र च सम्यगभिधायाः प्राधान्यात्तन्मूलकोऽविवक्षितवाच्यपरवाच्य एवं प्रथमं निरूपयितुमुचितः तथापि लक्षणामूलकं
जन्मायाः प्राक् निरूपणात् लक्षणानन्तरमेव प्रोक्तत्वे क्रमम् अनुपादाय स्वीकृत्य [illegible] प्रथममाद्यमुद्दिश्य विभज्यते । अवि-
वक्षितवाच्यो नाम यत्र वाच्यं न विवक्षितं ध्वनौ । अर्थान्तरे संक्रमितम् अत्यन्तं वा तिरस्कृतं वा वाच्यं वाच्यजात्यादिधर्मिणं ध्वनौ । अविवक्षितो वा-
च्येन रूपेणान्यबोधविषयतयाऽनपेक्षितोपयोगः । तत्र पदार्थाविवक्षितवाच्यमात्रस्य नायं विभागः किं तु तद्विशेषस्य ध्वनेः न लक्षणा-
द्या तथा च गमनः [illegible] यापि यत्र दोरेकार्थपरामर्शीकृतया तत्र ध्वनावित्तिलक्षणायाः सर्वस्य भेदसमुच्चये [illegible] भिरेव लभ्यते । अर्थान्त-
रसंक्रमितभेदो लक्षणामूलगूढव्यंग्यप्राधान्ये सति संभवति । अविवक्षितत्वं च वाच्यस्यान्वयानुपपत्तेः सा च वाच्यस्यानुपयुक्तत्वे
न उपयोगि रूपान्तरेण परिणामः स्वतन्त्रवाच्यायोग्यत्वात् अनुपयुक्तत्वमपि तु नरसंकेतत्वात् तद्विशेषानाधायकत्वमात्राद्वा ।
तत्रोभयत्रापि वाच्यमर्थान्तरे उपयोगि नित्यं तावच्छेदकेन संक्रमितमाक्षायलेन परिणामितं वा अत्यन्ततिरस्कृतं वार्थान्तरेण लक्ष्यत

काप्र०
२१

इत्यर्थः। द्वितीये त्ववाच्यमत्यंततिरस्कृतं। न केनापि रूपेणान्वयप्रविष्टं। तत्रार्थांतरसंक्रमितवाच्ये पुनरुक्ते यथा। तालाजाअंतिगु
णाजालाते सहिअएहिँ घेप्पंति। रइकिरणाणुग्गहिआइं होंति कमलाइं कमलाइं॥ अत्र द्वितीयकमलशब्दः सौरभादिगुणयुक्त
त्वरूपे लक्ष्ये संक्रमितवाच्यः। विशेषानाधायकत्वमात्राधया। तामस्मिन्नव किंचिद्गुणसमुदायो ऽवतिष्ठति। आत्मीयोप
तिमादायसिद्धिमित्यत्रविधेयहितत्व। अत्र वचमीत्यनुपयुक्तार्थं। अनुयायादानेपि वचनक्रियाप्रतीतेः। अतउपदेशल
लक्षणं। तत्र वाच्यार्थः संक्रमितः। हितसाधनत्वं व्यंग्यं एवं त्वामस्मीति पदेप्यनुपयुक्तार्थं। सेवो मतयैव युष्म
दर्थस्य वचनकर्मतावगतेः। वचमीसुत्तमपुरुषेणैवास्मदर्थस्य तत्कर्तृकत्वप्रत्ययात्। अतस्ताभ्यां लक्ष्य
योरुपदेश्यात्मत्वयोस्तद्वाच्यौ संक्रमितौ। तथा आत्मीयाया एवमतेः सर्वैरास्थानादनुपयुक्तत्वेनात्मीयप
रावेनप्रमाणापरिगृहीतत्वे लक्ष्यमाणे तद्वाच्यं संक्रमितं। अस्मच्छुत्तमइत्यत्राप्यर्थ्यहणादस्मियोगे
पि वच्मीसुत्तमपुरुषः। अत्यंततिरस्कृतं यथा। उपकृतं बहु नाम किमुच्यते सुजनता भवता प्रथिता परं वि

राम
२१

वे

दधदीदृशमेव सदा सखे सुखितमास्व ततः शरदां शतं· अत्रापकारिण्यन्वयायोग्येरूपकृतादिपदैः स्वार्थो वि
परीतं लक्ष्यते· न वक्तव्यावस्य कथंचित्प्रवेशः त्वयैवमपकारे ऽपि क्रियमाणे मया प्रियमेवाचरितमिति स्वसाधुत्वं
व्यंग्यं· तवोपकारापकारविवेको नास्तीति वा· अयं च प्रभेदो न केवलं विरोधिलक्षणया· किं त्वन्यत्रापि· यथा
मम· आश्रुतस्तस्वेदकरोऽसलायाः स्मितावरूढप्रतिकूलवाचः· प्रियो विहायाधरमायताक्ष्याः पयोधिरापप्र
तिषेधमेव· अत्र पपाविवत्वेनेनसो ल्कंठं निरीक्षणं लक्ष्यं· उत्कंठातिशयो व्यंग्यः॥ द्वितीये ध्वनिभेदं कारिकार्धेना
नुद्दिश्य विभजते विवक्षितं वान्यपरं वाच्यं यत्रापरस्तु सः· ध्वनिरिति प्रकरणाल्लभ्यते· अन्यपरं· व्यंग्योपसर्जनी
भूतं· अयं भेदो ऽभिधामूलत्वगूढव्यंग्यप्राधान्ये सति द्रष्टव्यः॥ इयमत्र· कोऽप्यलक्ष्यक्रमव्यंग्यो लक्ष्यव्यंग्यक्र
मः परः स्वीकृत्य हन्यायमाश्रित्यालक्ष्यक्रमव्यंग्यस्य पूर्वमुद्देशः तस्यैकत्वात् द्वितीयस्य तु प्रपंचाद्बहुभेदत्वात्
विभावानुभावव्यभिचारिणः किं तु रसैः कैश्चिद्भिन्नत्वाघत इत्यस्ति विभावादिरसप्रतीत्योः क्रमः सुलक्षणतस्त इति क्रमस्या
लक्ष्यत्वलक्ष्यत्वकृतं भेदद्वयमिति सर्वः॥ रसभावतदाभासभावशान्त्यादिरक्रमः भिन्नो रसाद्यलंकारादलंका

भि

स्परिच्छिन्नस्य निरतिशयस्य वेद्यान्तरसंपर्कशून्यस्य तदभावात् आभासत्वं तु तिर्यगाद्यधिकरणतयाऽविरुद्धं मिश्र इति। २४

काप्र०
२२

धितया स्थितः। अक्रमः। अलक्ष्यक्रमः तद्भेदेन रसभावयोः परामर्शः। आदिग्रहणाद्भावोदयभावसंधिभावशबलता
नि। न त्वाभासवत् रसस्पर्शोऽस्यादयः किं नोक्ताः निरंतरावयवस्यापत्र प्रधाने रसादिस्तत्र ध्वनिः। यत्र त्वप्रधाने तत्रालं
कार इति भावः॥ रसस्वरूपमाह॥ कारणान्यथ कार्याणि सहकारीणि यानि च रत्यादेः स्थायिनो लोके तानि चेन्ना
ट्यकाव्ययोः॥ विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः॥ व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतं त्रैयेति
समुद्बुद्धे कारणानि प्रमदोद्यानादीनि कारकोद्दीपकरूपाणि। कार्याणि। स्वेदः स्तंभोऽथ रोमांचः स्वरभंगोऽथ वे
पथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः। बाह्यानि बुद्धिशरीरारंभरूपाणि च कटाक्षभुजाक्षेपादीनि। स
हकारीणि। तेषु जनयितव्येषु उत्कंठादीनि विभावाः। आलंबनोद्दीपनरूपाः। चेत् रत्यादिस्थायिनं तत्तद्देश्यर्थः। प
यस्य द्दीपकस्य स्थायिनि न कारणत्वे। किं तत्त्वं न्ते तस्मिन्नई पदुत्कबोधायकत्वरूपमुद्दीपकत्वं तथाप्यानु
द्दीपितोऽप्यजातप्राय एवेति उद्दीपकेपि कारकत्वोपचारात् तत्रापि विभावव्यवहारः। विभावादिसंज्ञा च विभाव
नादिव्यापारयोगात्। तन्मयीभाव। वासनारूपतया स्थितान्नरत्यादीन् स्थायिनो विभावयंतीति रसास्वादांकु

राम
२२

रयोग्यतां नयंतीति विभावाः अनुभावयंतीति वतान इत्यनुभावाः पोषकतया विशेषेणाभितः कार्ये स्थायिनं चा
रयंति विशेषेणाभिमुख्येन च रंतीति वा व्यभिचारिणः व्यक्तः स इति व्यक्तिश्चर्वणानियमः सा च विशेषणं तथा च
व्यक्तिविशिष्ट एव स्थायी रसः एवं च रसस्याकार्यत्ववचनेऽपि विभावादिभिः कार्यत्वं स्थायिनः स्थायिनो जन्नात र
विभावादिकार्यतापाः एव प्रकृतत्वात् विशिष्टत्वस्याकार्यताऽनवच्छेदकत्वात् नीलघटत्ववत् तस्मात् स्थायी
न रसः किं तु विभावादिमेलके व्यक्तेनेव वा अन्यथा न कार्यमित्यादि ग्रंथविरोधादित्यादि प्रसयितमा अमनादेयं
संतेरिति यस्य यानि कारणादीनि संतेस्तज्जातीयैरित्यर्थः स्थायी विरुद्धैरविरुद्धैर्वा भावैरतिरस्कृतप्रवाहो
भावः यदुक्तं विरुद्धा अविरुद्धा वा यं तिरोधातुमक्षमाः आनंदांकुरकंदोऽसौ भावः स्थायिपदास्पदमिति नव्येयं
स्वकपोलकल्पना स्वकारस्य उक्तं हि भरतेन विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति॥ एतद्धि
व्याचष्टे भट्टलोल्लटप्रभृतयः स्थायिनो विभावेनोत्पाद्योत्पादकभावरूपादनुभावेन गम्यगमकभावरूपाद्व्य
भिचारिणा पोष्यपोषकभावरूपात् संयोगात् संबंधात् रसस्य निष्पत्तिः उत्पत्तिरभिव्यक्तिः पुष्टिश्चेत्यर्थः

45

का०प्र० २२

द्वा

तथाहि· ललनादिभिरालंबनविभावैः स्थायी रत्यादिको जनितः उद्यानादिभिरुद्दीपनविभावैरुद्दीपितः अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः प्रतीतियोग्यः कृतः व्यभिचारिभिरुत्कंठादिभिः परिपोषितो रामादावनुकार्ये रसः नटे तु तुल्यरूपतानुसंधानवशादारोप्यमाणः सामाजिकानां चमत्कारहेतुरिति· तदेतद्दूषयति· सामाजिकेषु तदभावे तत्र चमत्कारानुभवविरोधात्· न च तज्ज्ञानमेव चमत्कारहेतुः शब्दज्ञानेपि तदापत्तेः लौकिकशृंगारादिदर्शनेनापि चमत्कारप्रसंगात्· न चानुभावादिज्ञानेन बलात्तदारोपस्तथा न तु सा क्वचित्कारमात्रमिति वाच्यं· चंदनस्सुखादे वैपरीत्यदर्शनात्· अन्यथैवोपपन्नत्वात् इत्याकल्पनायामानाभावाच्च· श्रीशंकुकस्तु स्थायिनो विभावादिभिरनुमाप्यानुमापकभावरूपसंबंधात् रसस्यानिष्पत्तिरनुमितिरित्यर्थः तथाहि· विषयनियमविषयाधीः सम्यक्बुद्धिः अयमाराम एवायमयमेव रामः इत्ययोगान्ययोगव्यवच्छेदविषये अनेनतरावती र्गीवाधाद्धमिथ्याधीः यथैवोत्तरकालिकेन रामोयमिति वाधेन रामोयमिति· विरुद्धोभयकोटिकानुसंधायः यथा अयं रामो न वेति संशयो मयविषयाधीः सादृश्यधीः यथा रामसदृशोयमिति ताभ्यो लोकप्रसिद्धाभ्यो विलक्षणाया चित्रतुरगो यमितिवत् रामोयमिति बुद्धया अ

राम २२

यमेपरामृतोन दोषियपी क्रियते · ततस्तत्राविद्यमानमपि विभावादित्रयं लिंगमवगम्यते · कुतः पूर्वमेव रामो वा
घाविर्भाविनगुरुशिक्षाभ्यासाभ्यस्तकृतानिशापिताभ्यासेन नटेन सेयं ममांगेषु सुधारसच्छटा सुपूरकर्पूरशलाकि
का दृशोः मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गतेति · दैवादहमद्य तया चपलायतनेत्रया वि
युक्तश्च · अविरलविलोलजलदः कालः समुपागतश्चायमित्यादि काव्यानुसंधानवलाराल लंघनोद्दीपनव्यक्तौ तद
नुगुणास्य रोमांचादेर्दर्शनीयस्याविर्भाविन कंजनीयस्योत्कंठादेः तत्कार्यप्रकटनेन च प्रकाशनात् · अथ तैः कृ
त्रिमत्वेनाज्ञातैर्लिंगैरपि कृत्रिमत्वेनाज्ञानात् स्थायी रत्यादिरनुमीयते · सैव चानुमितिः सचमत्कारप्रतीतिः स
चर्वणा · अतस्तत्या विषयीक्रियमाणः स्थायी रस इत्युच्यते · चर्वणा च सामाजिकानामिति तेष्वेव रस इति व्य
वहारः · ननु साक्षात्कारस्यैव चमत्कारोनु अनुमित्यादेरपि · अन्यथा सुखादावनुमीयमानेऽपि स्यात् · न स्यात् तत्र वस्तु
सौंदर्यबलाद्रसनीयत्वेन स्थायिनामन्यानुमेयवैलक्षण्यात् · तथापि स्थायिनो नटेऽसत्त्वाद्बाधावतारेऽनुमि
तिरेव कथं स्यादिति चेत् न · अभावनिश्चयाभावात् स्थापितया संभाव्यमानत्वादिति · एतदप्यहृदयमा हि · यतः

47

भोज्य

प्रत्यक्षमेवज्ञानं सचमत्कारं नानुमित्यादिरिति लोकप्रसिद्धिमवधूयान्यथाकल्पने मानाभावः स्तत्र स्थायिन्येव यो
ज्ञनात्समवात मद्नायकस्य· न तावन्नटगतत्वेन· न रामगतत्वेनानुमीयते· नचोत्पाद्यते· न सामाजिकगतत्वेन व्यज
ते· आद्यपक्षयोरुक्तदोषात्· अन्यगतेनान्येषां चमत्काराभावाच्च· अंत्ये सिद्धस्यैव व्यंग्यत्वात् रसस्य चासिद्धत्वात्· स
र्वेषामेवाभिव्यक्तिप्रसंगाच्च· तस्माद्विभावादिभिः संयोगात् भोजकभावसंबंधात् रसस्य निष्पत्तिर्भुक्तिरिति सूत्रा
र्थः· न च भोगपक्षेपि दोषावकाशः· भोगस्यालौकिकत्वात्· तथाप्यन्यनिष्ठः स्थायी अन्यनिष्ठैरेव विभावादिभिः
कथमन्येन भोक्तव्योऽतिप्रसंगादिति चेत्· उच्यते· काव्यात्मनः काव्यस्य त्रयो व्यापाराः· अभिधा· भावकत्वं भोज
कत्वं चाभिधामभिधानिरंतरसांतरार्थनिष्ठत्वेन द्विविधा भावकत्वं साधारणीकरणं· तेन हि व्यापारेण विभावादयः स्था
यी च साधारणीक्रियंते· साधारणीकरणं चैतदेव· यत्सीतादिविशेषाणां कामिनीत्वादिसामान्येनोपस्थितिः
स्थाय्यनुभावादीनां च संबंधिविशेषानवच्छिन्नत्वेन· अंते व्यापारहृदयेनाद्वेपि· एवं काव्येनाधेहि तीयव्यापारेण
साधारणीकृतैर्विभावादिभिस्तृतीयव्यापारसाहित्येन तथाकृत एव स्थायी भुज्यते· भोगश्च सत्त्वगुणोद्रेकात् प्र

कारणतेयज्ञाने दस्त स्वरूपाज्ञानन्यालेवनायासंवित्स्वरूपो लौकिकसुखानुभवविलक्षणः सत्वरजस्तमसो
गुणानामुद्रेकेण क्रमात्सुखदुःखमोहाः प्रकाशयन्ते। उद्रेकश्च स्वेतराभिभवेनावस्थानमिति सांख्यसिद्धांता
नुसारेणाविष्टगुणैतदपि न सम्यक्। एतादृशव्यापारद्वयकल्पने प्रमाणाभावात्। मुक्तेषु नातिरेकस्यानुभव
बाधितत्वेन निष्पद्यमानस्य चास्याभिव्यक्तिपक्ष एव पर्यवसानात्। अभिव्यक्तावप्यभिनवगुप्तपादानां स्थायिनो
विभावादिभिः समं व्यंग्यव्यंजकभावरूपात्संबंधात् विभावादीनामेव वा परस्परं संयोगात् मिलितानां तत्र स्थायिनिष्ठ
त्विरभिव्यक्तिः। तथाहि लोके प्रमदादिभिः कारणादिभिः स्थायिनो रत्यादेरनुमानेऽभ्यासेन पाटवं सहितिप्रवृत्तिस्त
इत्तां सामाजिकानां सहृदयानां ततोऽतः स्थितो रत्यादिः स्थायी काव्ये नाट्ये च तेषां लंकारयोगात् वर्णितैर्विभावैः भिनये नव
यद्योक्तविभावनादिव्यापारवत्वाद् लौकिकविभावादिशब्दव्यपदेशयोग्यदशाविशिष्टैः तैरेव कारणादिभिर्व्यज्य
ते। ननु व्यंग्ये येषां पूर्वं रत्यादिर्नोत्पन्नस्तेषां तद्वासनाविरहिणां किं रसाभिव्यक्तिर्नोत्स्येव। कः संदेहः। अत एव शृंगारि
णामेव शृंगाररसानिर्विस्नस्भावानामेव हृदयानां तस्याभिव्यक्तिरित्यायनुभूयते किंच परापि स्वाभाविकी वासना

x.४ कायिको वाचिकश्चैव आहार्यः सात्विकस्तथा चत्वारोऽभिनयाः प्रोक्ता नाट्यशास्त्रे

प्र
समूहालं कारि

का०प्र०
२५

२ रंगादिष्वाप्यामीमांसकवैय्याकरणादीनां नरसामिव्यक्तिः ४१

सहकारिसमीर्यविना [illegible]

तदुक्तं। बासना चेन्नहेतुः स्यात्तस्यान्मीमांसकादिष्विति। ननु जेयाष्वन्यनिष्ठैर्विभावादिभिः कथमन्यनिष्ठस्यसद्धा
यिनोऽभिव्यक्तिः उच्यते। ममैवैते शत्रोरेवैते तटस्थस्यैवैत इति संबंधिविशेषस्वीकारनियमस्य। न ममैवैते। न श
त्रोरेवैते। न तटस्थस्यैवैत इति संबंधिविशेषपरिहारनियमस्याप्यध्यवसानात्तेषां साधारण्येन प्रतीतेः साधारण्ये
न प्रतीतिश्च न सर्वसंबंधितया प्रतीतिः किंतु संबंधिविशेषीयत्वेनाप्रतीतौ प्रतीतिः यथा अमुकस्यैवेत्यवधारणां
विनाऽमुकस्यैवेत्यवधारणां प्रतीतिः अत एवोक्तं। ममैवैत इति नियमानध्यवसायादिति। तथा च स्वीयत्वासंसर्गाग्रहा
त्स्वीयत्वसंसर्गाग्रहप्रयोजनं संपद्यते। एवं च वाक्यार्थबोधे संबंधिविषयत्वानुभवोपि न विरुध्यते। संसर्गबोधे
संबंधी न विषयः किंतु पदार्थस्मरणे एवेत्यनुभवविरोधाद्विचारासहत्वाच्चानुपादेयं। न चैवं विभावादीनां सा
धारण्यं विना तत्साक्षात्कारस्य साधारण्यं स्थायिनस्तत्कथं स्यादिति वाच्यं तदा तन्निष्ठत्वात्तयोः साधा
रण्यापित्तस्यन्नरसप्रतीतिविरोधस्थापितद्दोषसहृदयसंवादेन स्यात्। तस्मादेवालौकिकता इत्यस्वीकारका राम

२५

50

रस्यमिति॰ उच्यते॰ [illegible]ते॰ उपायानां विभावादीनामुक्तरूपसाधारण्यबलात् रसानुभवकाले सह्यापिनो प्रमातृवि
शेषनिष्ठत्वेन स्वरूपायाः परिमितप्रमातृ[illegible]विगलनमज्ञानेन हृदयेन उन्मिषितो वेद्यान्तरसंपर्कशून्योऽपरि
मितो भावोऽस्य तेन प्रमात्रा सकलसहृदयसंवादकारिणा प्रमातृविशेषसंबन्धमहत्वेन साधारण्येन सह्यापि
चर्व्यते॰ ननु चर्वणाविशिष्टः सह्यापी रस इत्युच्यते॰ चर्वणायाश्च सह्यापी विपरीतं क्रियते॰ न तस्य सुखात्मकस्यात्मेति न
रसस्य व्यक्तिरिति वेतन स्वप्रकाशानन्देस्वाकारवदभिन्नस्याप्यात्मनो विषयीकरणात् अभिव्यक्तिविशिष्टस्य
रत्यादिः सह्यापी चर्व्यमाणे तेक प्राणा तया चर्वणानाशे विनष्टो रस इति प्रतीतिविषयो विभावादिजीवितावधिर्ले
नानित्यचर्वणाः पुरःस्वपरिस्फुरन् हृदयमिव प्रविशन्नसर्वांगीणमिवालिंगन[illegible]त्वेन्य
त्सर्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन्नेव एवालौकिकचमत्कारी शृंगारादिको रस इत्युच्यते॰ न रका
त्वेवं सह्यापि विभावादिसमूहालंबनात्मिका रसस्य प्रतीतिरिति पर्यवसन्नं॰ तत्र न पुनः केवलविभावादीनां पर्या दी
केन प्रतीतिप्रसंगात्॰ घटपटादिवदिति समूहालंबनवदित्येतेन्नः॰ पानकरसन्यायेन चर्वणात्मपत्यायानुके

कर्पूरादिर्दरसो न पार्थक्येनानुभूयते । तथात्रापि विभावादेः । ननु विभावादीनां परामर्शस्यान्वयव्यतिरेकाभ्यां तत्का
र्यत्वं रसस्य किं नोक्तमिति चेत् न । विभावादिपरामर्शस्य कारणत्वे परिस्पन्दादिनिमित्तकारणत्वमेव न चैतन्नाशस्य का
र्यनाशात् तादृक्त्वादित्यादीनां तथात्वानभ्युपगमात् । चेदत्र नस्पर्शजन्यसुखादिन्यायेन विभातीति चेत् न हि तत्स्पर्शाभा
वेन सुखं विनाश्यते किं तु तदभावे कारणाभावात् कार्यं नोत्पद्यते । उत्पन्नस्य सुखस्य तु हि कदाचिन्नाश इति चेत् न । चिरो
त्पन्नानां तरुणां । आविर्भूतास्त्विति चेन्न । रसस्य वेद्यान्तरसंपर्कशून्यतया ज्ञानान्तरादेस्तत्कालेऽभावात् । नन्वेवं बोधि
व्यवस्थापितमान इति चेत् न सुमनसः सकलैलोकोत्तरतया दोषासंस्पर्शात् । किं च चर्वणाविशिष्टः स्थायी रसः न च कार्य
मुपस्थाप्यो विभावादिविशिष्टे हेतुः तत्स्थितेर्ज्ञाप्य इति चेत् न । विभावादिपरामर्शं विना तत्स्थितेरभावात् । न चैवं केवलसामग्रीनि
ष्पादिका ज्ञापिका चेति संभवति । किं च स्वाभिन्नतज्ज्ञानविषयो हि तज्ज्ञाप्य उच्यते । अतः स्वप्रकाशानन्दचि
दात्मकनेन चक्षुरादिज्ञाप्ये घटादिः तथा । स्वाभिन्नतज्ज्ञानविषयत्वाहतेः ज्ञाप्यत्वेन नि
षेधात् । किं तर्हि ममायमिति [struck] र्यं जनितश्चर्वणा यः कारककारकत्व एका यामन्यो हि

४१ तत्पन्नोरसोद्दीपोसइत्यादिव्यव ४२

तुर्न लोकसिद्ध इति चेन्न। अलौकिकसिद्धेर्न्न दूषणमेतन्न दूषणं। कथं तर्हि विभावादिभिर्निहार इति चेत्। आद्यस्तावत् स्वर्वेशोत्प
स्मात् तत्रोत्पत्त्युपचारात्। द्वितीयो विगुणालंकाराद्यभिन्नरसादिविषया या लौकिकी प्रमितिः। अस्या पक्षे योगिनां युञ्जानप
दवाच्यानां जगदुद्देहविषयकत्वशालि विज्ञानं। तद्व्यतिरिक्तयोगिनां युक्तपदाभिधेयानां बाह्यार्थसंस्पर्शरहितं स्वात्ममा
त्रविषयं संवेदनं तेभ्यो गुणालंकारादियुक्तरसादि [struck]
[struck] मात्रविषयतया विलक्षणं यत्संवेदनं तत्तेभ्य इतरत् ये इति मतम्। न केवलमसत्वादज्ञाप्यो सः किं त्वितोपि यत्तस्य ग्राह १
कं न निर्विकल्पकं विभावादिपरामर्शस्य निर्विकल्पकज्ञानेनायोग्यत्वात्। नापि स्वाभिन्नसविकल्पकं। तत्प्रमाणस्यालौकि
कानंदमयस्वसंवेदनमात्रसिद्धत्वात्। वर्वर्णदर्शनादिज्ञानान्तराभावात् स्वाभिन्नसविकल्पकविषयत्वेन ज्ञाप्यत्वमिति। मे
वं तर्हि निर्विकल्पकस्वाभिन्नसविकल्पकयोरन्यतरविषयत्वाभावोऽपरविषयत्वपर्यवसन्नः [struck] भा
[struck] तयोर्वेकविषयत्वाभा
वेऽपरविषयत्वप्रसक्तिरित्युभयविषयत्वाभावेऽन्यविषयत्वं प्रसज्येतेति चेन्न। एवं ह्युभयरूपत्वमापद्यमानः स्वा

का० प्र०
२७

मिन्नत्साधिकस्य क[illegible]विषयत्वरूपतृतीयकोटिशालितयालोकोत्तरचमत्कारमेवावगमयतीति पुनर्विरोधाभिधि ।। अ
थ विभावाद्यो मिलिताः किमिति व्यंजकत्वेन निर्दिष्टाः एकैकस्य व्यंजकत्वे व्यभिचारात् ।। प्रत्येकैकस्मादन्यद्या तेपा
त ते व्याप्यस्यैव रसस्याभिव्यक्तिरित्यव्यभिचार इति चेत् न व्याघ्रादयो हि विभावाः भयानकस्येव वीराद्भुतवीराणां अश्रुपातादि
यो नुभावाः शृंगारस्येव करुणभयानकयोः चिंतादयो व्यभिचारिणः शृंगारस्येव वीरकरुणभयानकानामित्य हृदया
क्षेपान्नियमात् न चैवं मिलितस्यैव व्यंजकत्वे एकैकोपस्थितौ रसव्यक्तिर्न स्यात् दृश्यते चासौ यथा विपदलिमलिनबु
गर्भनिःस्यंदमधुकरकोकिलकूजितैर्दिशां श्रीः धरणिरभिनवांकुरांकटंकाम्रशातिपरे दयिते प्रसीद मुग्धे इत्यादौ कमिनी
गतापारतेरालंबनोद्दीपनविभावमात्रस्योपस्थितौ एवं परिमृदितमृणालीम्लानमंगं प्रवृत्तिः कथमपि परिवारगणो
नाभिः क्रियासु कलयति च हिमांशोर्निष्कलंकस्य लक्ष्मीमभिनवकरिदंतच्छेदकांतः कपोल इत्यादावंगम्लानिन्या
द्यनुभावमात्रस्य दूरारूढकमागतेविवलितं संभाविताः स्फारितं संश्लिष्यत्यरुणं गृहीतवसने किं वा चितन्नू
तेः मानिन्याश्चरणानतिव्यतिकरे बाष्पांबुपूर्णेक्षणं चक्षुर्जातमहोप्रपंचचतुरं जातागसि प्रेयसि इत्यादाहु

राम
२७

54

कादिविभावसाधारण्यंगम्यमानोमौल्स्तबकफलं॰ ज्ञोहर्षकोपास्पृपाम्रसादानोव्यभिचारिमात्राणां॰ यद्यप्यत्रप्रेयसीः [illegible] लंब
नविभावोप्यस्तितथापिरत्यनुकूलधर्मेवत्वेपाऽनिर्देशादनस्तिकल्पएवेति॰ मैवं॰ एवाविभावारी नामसाधा [illegible] रण्ये ना
न्यद्वयालेपकत्वेनाप्यविमिलितानामेवव्यंजकत्वात्॰ नचैवंचेदसाधारण्येकिमन्यद्वयालेपरोनव॰ एकैकव्य [illegible] भिचा
रेणाक्षिप्योपादानो॰ अथ साधारण्यमेवकुर्वन्तर्हि स्थायिविशेषमोगम्यविभावाद्यालेपकत्वमिति॰ उच्यते॰ [illegible] एकैक
स्यव्यभिचारातमिमिलितानांव्यंजकत्वेसिद्धे ते ऽसाधारणेनापीतरद्वयमाक्षिप्यते॰ किंच रसस्यविभावादिरह [illegible] महा
लंबनरूपत्वात्एकैकत्वाद्साधारणाद्यपिव्यंजकभावात्तमिमिलितानामेवव्यंजकत्वे॰ अतो ऽसाधारणेनाप [illegible] तरद्व
यमाक्षिप्यते॰ ततोमिलितेभ्यस्तद्भिव्यक्तिरिति॰ ॥ केचित्तु॰ एक एव शृंगारो रसः॰ केचिद्दा [illegible]
[illegible]
[illegible] दयोर्यो [illegible]
[illegible] दि॰ तन्नि [illegible] णसापरसभेद॰ ।नाह
अभिलाषस्थायिकमौल्यरस अट्टहास्यस्थायिकभक्तिरसास्य हास्यस्थायिककार्पण्यरसानामिहायणं द्दशोत्पत्स्यादिपदार्थोः २

काप्र०
१८

शृंगारहास्यकरुणारौद्रवीरभयानकाः बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः शांतस्य रोमांचादिविरहे [illegible]न
भिनेयत्वात् काव्यमात्रगोचरत्वमिति तदभिधानान्नैष इत्युक्तं यद्वा नाट्ये तावदष्टौ रसाः प्रतिपादिताः अतः काव्ये पि
तावंत इत्यर्थः ननु रसः सुखात्मक इति प्रतिपादितं तत्कथं दुःखमयः करुणादिको रस इति चे[illegible]
[illegible] न लोके तथा
त्वे पि काव्यादौ पार्यंतिकालौकिकसुखोदयात् अन्यथा मे क्षावतामप्रवृत्त्यापत्तेः शृंगारादीनां लक्षणं च रत्यादिप्र
कृतिकत्वं तत्र मनोनुकूलेष्वर्थेषु सुखसंवेदनं रतिः तत्प्रकृतिको रसः शृंगारः स द्वेधा संभोगो विप्रलंभश्च तत्रा
नुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ दर्शनस्पर्शनादीनि स संभोग उदाहृतः स च परस्परावलोकनालिंगना
धिभेदादपरिगणेय इत्येक एव गण्यते। भावो यदा रतिर्नाम प्रकर्षमधिगच्छति। नाधिगच्छति वाभीष्टं विप्रलंभ
स्तदोच्यते स च संगमपूर्वस्तदन्यश्च तत्राद्यो ऽभिलाषहेतुक इत्युच्यते अभिलाषपदेन तद्धेतोरनादि[illegible]ते
[illegible] संगाभावस्य लक्षणात् अप्राप्तस्य कविदीप्य[illegible]प्र
अनादिरेव न त्वनंतः एवंरूपः संगाभावस्तस्याभाव[illegible]
पर्यवसितः २

राम
१८

४ ५ विप्रलंभेस्य च आयं समुद्दिष्टनामकविषयः। युनोरेकतरस्मिन् गतवति लोकांतरं पुनर्लभ्ये विमनायते यदैकस्तदा भवेत्करुणविप्रलंभ इत्युक्तेः

रागेणनबाधमानरूपः सर्द्दष्याहेतुकइत्युच्यते ईर्ष्या यदेन मानहेतोरुपलक्षणात् क्वचित्तु कार्यवशाद्देशांतरस्थिते
सप्रवासहेतुकोऽभिधीयते उत्पद्यमानो [illegible]
[illegible] त्स्यमानो वापि प्रवासोस्व शृंगारविप्रलंभप्रयोज
कायितिनाख्यातिः प्रवासशब्देन स्थानलक्षणात् क्वचित्तशापात् सवशापहेतुकइतिव्यवह्रियते क्वचित्तु कश्चित् यातिर
क्षातत्गुरुलज्जादितः कारणात् स एष विरहहेतुकइत्युच्यते करुणस्तु शृंगारस्यापि त्रैवात भावः तत्र संभोगो नापि
कारस्थोनापकारस्थः [illegible] कतेरणे दाहरणं शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनैर्निद्राव्याजमु
पागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं विस्रब्धं परिरभ्य जाततपुलकामालोक्य गंडस्थलीं लज्जानम्रमुखी प्रियेण ह
सता बाला चिरं चुंबिता [illegible] लोक्येति लज्जापासमलुप्तकार्ये क्वचिंल्लं मुग्धाक्षि विनेव कंचुलिकया धत्ते मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि शय्योपांतनिविष्टसस्मितसखीनेत्रोत्सवानंदितो निर्यातः शना
नैकैरलीकवचनोपन्यासमालीजनः बीटिकोपसनमर्थी विप्रलंभेप्य भिलाष हेतुको यथा प्रेमार्द्राः प्र

काप्र०
२९

णापस्फुरणः परिचयादुन्नतरागोदयास्तास्ता मुग्धदृशो ■■ निसर्गमधुराश्चेष्टा भवेयुर्मयि यास्वंतःकरणस्य गा
बाह्यकरणव्यापाररोधी क्षणादाशंसापरिकल्पितास्वपि भवत्यानंदसांद्रो लयः ॥ प्रेम स्नेहः स एव प्रकृष्टः प्रणयः स एव प
विश्वयातिशयेन रंजनक्षमो रागः ॥ ईर्ष्याहेतुको यथा । सा पत्युः प्रथमापराधसमये सख्योपदेशं विना नो जानाति सविभ्र मां
के गवलनावक्रोक्तिसंसूचनं स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला बाला केवलमेव रोदिति लुठल्लोलाल कै
सख्योपदेशः रश्रुभिः ॥ सख्योपदेशं भविष्यत्प्रवासहेतुको यथा । प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं धृत्या न क्षणम सि
तं व्यवसितं चित्तेन गंतुं पुरः यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता गंतव्ये सति जीवित प्रियसुहृत्सार्थः किं त्य
ज्यते ॥ भूतप्रवासहेतुर्यथा मम । किं पद्मं भवेद्दधराग्रां कति वा पल्लवसंचया भवेयुः कियती च समुद्रिका रेवुजा न प
रितापोपचिचीयेत मे कृशांग्याः सख्याः प्रवासिनं नायकं प्रतीयमुक्तिः ॥ भवतहेतुको यथा ममैव । किमतः परि खिद्य से
कतिपयैरेव प्रियेवासरैरायातो नायमितो हि ध्येहि परितः प्रास्थानिकं मंगलं एवं वादिनि वल्लभे नेदपितया निश्वस्य मा
रो कृतो मंगलस्य कलशो विलोचनपयोधाराभिरापूरितः ॥ शापहेतुको यथा । त्वामालिख्य प्रणयकुपितां धा तु राम
२९

गेहशिलायामासीने ते वरुणपतितं पादं दृष्ट्वा मि कर्तुं अन्ये स्तावन्मुहुरुपविश्य तेहृष्यिरालुप्यातेमे कूररस्तस्मिन्नपि न सह
ते संगमे नो कृतान्तः। आलिङ्ग्य पीडा विषमे एवं विरहहेतुको यथा। अन्यत्र व्रजतीति कोरव लुकथा ना स्यन्तादकुसुमघोमे
नेक्षुतिनागतश्च सहसा कोपं विधेः प्रक्रमः इत्यत्र एकल्पना कवलितस्वान्ता निशां तानि तरेबाला इन्त्रविवर्तने व्यतिकूरना
मोति निद्रां निशि एषा विरहोत्कण्ठितेत्यभिलाषहेतुकादेर्भिन्नते। पत्रीडादिभिश्चेतो विकासो हास उच्यते। त्यंयपेव कृते
तेन हास्यप्रकृतिको हास्यः यथा। आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे तारस्वनं प्रथि
तथूत्कमदात्प्रहारं हा हा हतोहमिति रोदिति विष्णुशर्मा। अत्र ताड्यमानो विष्णुशर्मोत्क्रन्दनं च विभावो रसात्मयस्य
एतद्वाक्यमनुभावः चापल्यादिर्व्यभिचारीति। इष्टनाशादिभिश्चेतो वैक्लव्यं शोकशब्दभाक्। आदिग्रहणादनिष्ट
शोकप्रकृतिकः करुणः यथा। हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषो धिक्प्राणान्पतितोशनिर्हुत
भुजस्तेङ्गेषु दग्धे दृशौ उद्धं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां गिरश्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्ती
रपि। अत्र चित्रपताकाविदीश्वरी संवोध्या तदङ्गदाहश्च विभावौ। प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोध उच्यते।

तत्प्रकृतिको रौद्रः यथा । कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदा
युधैः नरकरिपुणा सार्धं तेषां सभीमकिरीटिनामयमहमसृग्मेदोमांसैः करोमि दिशां बलिं कार्या
रंभेषु संरंभः स्थेयानुत्साह उच्यते । तत्प्रकृतिको वीरः स च त्रिधा युद्धवीरो दानवीरो दयावीरश्च । तत्र याप
या: क्षुद्राः संत्रासमेते विजहति हरयो भिन्नशक्रेभकुंभा युष्मद्देहेषु लज्जां दधति परममी सा
यका निष्पतंतः सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः किंचिद्भ्रूभंगलीलानियमि
तजलधिं राममन्वेषयामि ॥ परावृत्तनीयैस्तु शास्त्रानुमानतश्चित्तवैक्लव्यमिदं भयं । तत्प्रकृति
को भयानकः यथा । ग्रीवाभंगाभिरामं मुहुरनुपतति स्यंदने बद्धदृष्टिः पश्चार्धेन प्रविष्टः शरपतन
भयाद्भूयसा पूर्वकायं दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वा
द्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥ जुगुप्सा गर्हितार्थानां दोषमात्राल्पदर्शनात् । तत्प्रकृति
को बीभत्सः यथा । उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसान्यंसस्फिक्पृष्ठपिंडाद्यवय

मध

दानवीरो

र्थ

वत्सलमान्युगतपत्नीनिजगृह्यांश्रितः पर्यस्तनेत्रः प्रकीर्णतद्गमनः प्रेतरंकः करेकारं कुर्वस्थाद्दस्थिसंसंस्थस्थपुटगतमपि
रूक्षमसकृन्नमत्ति॰ स्थपुटं निम्नविषमं विस्मयश्चित्तविस्तारो वस्तुमाहात्म्यदर्शनात् तस्य कृतिकोद्भुतः यथा॰ किं
महानेषतवावतारः क्व कांतिरेषाऽभिनवैव भंगिः। लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः॥ एषां भे
दो वचनमात्रान्नसिद्धाती त्येषां विचित्रानुरूपानस्थायिभावानाह रति हासश्च शोकश्च क्रोधोत्साहौ भयं तथा
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः तत्रा विरुद्धा अविरुद्धा वा यं तिरोधातुमक्षमाः आनंदांकुरकंदो
सौ भावः स्थायिपदास्पदमिति सामान्यलक्षणं॰ अविशिष्टिति ष्वेषां स्वकतूत्रन्यायेन॰ फेनबुद्बुदन्यायेन लव
भिचारिणामित्र नेयां भेदः विशेषलक्षणान्युक्तानि अष्टावेव वेत स्थायिनोऽतो न्यूनाधिकसंख्याव्यंका
रसेनिरस्तेति॥ यद्यपि विभावानुभावावप्रतिपाद्य व्यंजकत्वपुरस्कारेणाव्यभिचारिभेदोपदर्शने॰ न कश्चि
तन्यायस्तथापि अंगपस्तावविवेचनायनिर्वेदस्य स्थायित्वव्यवस्थापनाय चव्यभिचारिभेदानाह निर्वेदग्ला
निशंकाख्यास्तथासूयामदश्रमाः आलस्यं चैव दैन्यं च चिंतामोहः स्मृतिर्धृतिः व्रीडा चपलता हर्ष आवेगो ज

त

का॰प्र॰ ३
३१

तो तथा ॥ गर्वो विषादः औत्सुक्यं निद्रापस्मार एव च स्वप्नो विबोधो ऽमर्षश्चाप्यवहित्थमथोग्रता मतिर्व्याधिस्तथो-
न्मादस्तथा मरणमेव च । त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ॥ नाम-
त एव समाख्याताः न तु लक्षणतः लक्षणं नामान्यैरेव स्पष्टं व दृष्टिगतत्वात् तथा तत्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वा-
वमानने तत्र चिन्ताश्रुनिश्वासवैवर्ण्योच्छ्वासदीनताः चित्तस्य खेदो निर्वेदस्तत्वज्ञानोदयादिभिरिति केचित् ॥ रत्याया-
सक्लमव्यासात्तृष्णानिनिः प्राणतेव या तस्यां वैवर्ण्यकंपानुत्साहकार्श्यादयो मताः ॥ अनर्थप्रतिभा शंका परक्रौर्य्या-
त्स्वदुर्नयात् वैवर्ण्यकंपवैस्वर्यपार्श्वालोकास्यशोषकृत् ॥ परोत्कर्षाक्षमा ऽसूया गर्वदौर्जन्यमन्युजा दो-
षोक्त्यवज्ञाभ्रूविभेदावज्ञा क्रोधेंगितादयः ॥ संमोहानंदसंभेदः सबलेंगवचोगतिः मधुपानादिजो हर्षो यो मदो ह्यविवि-
भावकृत उत्तमसत्वः प्रहसति गायति तथाधमप्रकृतिः परुषवचनाभिधायी रोदिति अधमसत्वः ॥ श्रमः खेदो-
ध्वरत्यादिः श्वासनिद्राभरादिकृत ॥ अंगग्लान्यो विभेदं च जके कारणकार्यतो आमस्यातिश्यापाव स्थामथ वा
ग्लानिः विरोधे लस्यापचयो ग्लानिराधिप्रकर्षान्मूर्छितेके आलस्यश्रमगर्भादैर्जाड्यं जृंभासितादिकृत ॥ दै-

राम
३१

गेत्यादिरनौजः स्यात् दैन्यं कार्श्यम्लानिरिमतं ध्यानं चिंता हिताना प्तेः शून्यताश्वासतापकृत् प्रयत्नस्पर्शविकाद्वेष्यस्मृति श्च
तेति केचन मोहो विचित्रता भीतिदुःखवेगानुचिंतनैः। घूर्णनाज्ञानपतनभ्रमणादर्शनादिकृत् ससदृशज्ञानचिंताद्यैः संस्का
राज्जायते स्मृतिः भ्रूसमुन्नासकरजवाद्यनादिस्फुटद्भवः। ज्ञानाभीष्टार्थसंप्राप्त्यादिस्या हायम्भावतोधृतिः सौहित्यवदनोह्ला
ससहासप्रतिभादिकृत् लज्जा दुराचारादिभिर्व्रीडा धार्ष्ट्याभावो निधीयते वस्त्राङ्गुलीयकस्पर्शनखरेखाधोमुखादिकृत चेतोनि
मीलनेत्रीगात्रसंगरागनखव्यादिभिरिति केचित् मात्सर्यद्वेषरागादेश्चापलं त्वनवस्थितिः आत्मप्रकाशनपरावेक्षावध
तोच्यत इति केचित् तत्र भर्त्सनपारुष्यस्वच्छंदाचरणादयः। मनःप्रसादोत्साभादेर्हर्षोश्रुस्वेदगद्गदाः आवेगो यस्तु विद्रव
रसादेः संभ्रमो मनः तत्र विद्रवरंगस्तंभः स्वेदः कंपः सखलद्गतिः अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः अनिमि
षनयननिरीक्षणतूष्णींभावादयस्तत्र क्रियाः स्वपारवश्याद्यैश्चिंतोल्के नभयादिभिरित्येके गर्वोभिजनलावण्यश्वर्या
दिर्मदः सविलासांगवीक्षाऽविनयावज्ञादिकृत्तु सः प्रारब्धकार्यासिद्ध्यादेर्विषादः सत्वसंक्षयः निश्वासोच्छ्वाससंता
सहायान्वेषणादयः कालाक्षमत्वमौत्सुक्यं रम्येच्छारतिसंभ्रमैः तत्रोच्छ्वासत्वराश्वासहृत्तापस्वेदविभ्रमाः निद्रा

काप्र०
३२

रवैमुख्यमिंद्रियाणां श्रमादिभिः तत्र स्वेदांगभंगाक्षिमीलनोच्छ्वासनादयः । आधिव्याध्यादिदुःखादेरपस्मारस्तथाविधः
मनःक्षेपस्त्वपस्मारो ग्रहावेशादिसंभव इति केचित् । विरोधिभावात्स्मर्तव्यस्यास्मृतिर्विस्मृतिर्भवेत् ध्यानमाद्यमनो
लाधिपरिलायादिकृत्तु सा स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः । कोपावेगभयग्लानिसुखदुःखादिकारकः । निद्राप
महेतुभ्यः प्रबोधश्चेतनागमः । जृंभांगभंगनयनमीलनांगावलोककृत् । अधिक्षेपापमानादेरमर्षोऽभिनिविष्टता
तत्र स्वेदः शिरःकंपनेत्ररागांगविक्रियाः ॥ लज्जाद्यैर्विक्रियागोपोऽवहित्था सान्यविक्रिया व्यापारांतरसंगित्ववदना
नमनादयः । द्विषोऽपराधदौर्मुख्यचौर्यैश्चंडत्वमुग्रता अत्र स्वेदः शिरःकंपतर्जनताडनादयः । भ्रांतिच्छेदोपदेशाभ्यां शास्त्रा
देस्तत्वधीर्मतिः । स्मेरता धृतिसंतोषो बहुमानस्तथात्मनि व्याधयः संनिपाताद्याः । तेषामन्यत्र विस्तरः । प्रस्वेदकंपतापा
द्यास्त्वनुभावतयोदिताः । उत्कंठाहर्षशोकादेरुन्मादश्चित्तविप्लवः । तस्मिन्नस्थानरुदितगीतहास्यासितादयः । जीवस्यो
द्गमनारंभो मरणं परिकीर्त्तितं संमोहेंद्रियसंग्लानिगात्रविक्षेपणादिकृत् अत्र च मरणावस्था नैकैर्विलक्षणा पठ्यते सा
च परेदुःखप्रहाणेच्छारूपत्वान् विप्रलंभैकसमयाश्लीका नातिरिच्यत इति तत्तद्दशानमस्त्रानुचितमिव लेकेऽप्यनुपेक्षतस्याः

राम
३२

64

दयावीरस्थायित्वमित्यत्र उक्तनानो चित्यमित्याहुः न चान्यत्र संचारित्वादेनाने फलवदिति वाच्यं स्थायित्वं तु रसाधारणत्वात्
तेषां हि क्वचन संचारिणः तदुक्तं शृंगारवीरयोर्हासो वीरे क्रोधस्तथा मतः शांते जुगुप्सा कथिता व्यभिचारितया पुनः इत्याद्यन्य
त्समुत्थेयं स्वयं भावितत्वं द्विमिरिति गर्जितादेर्मनः क्षोभस्त्रासो मोत्कंपिता हृदयः ३ हो वितर्कः संदेहो भ्रूशिरोंऽगुलिनर्तकः
॥ निर्वेदस्यामंगलप्रायस्य प्रथमान्निर्देशपत्वेऽपि प्राद्धि ईर्ष्यो मुख्यत्वमकामाने न स्थायित्वप्रतिपादनाय तेन निर्वेदस्थायि
भावो स्व्यः शांतोऽपि नवमो रसः तत्प्रकृतिकत्वात् यथा अहो वा हारे वा कुसुमशयने वा दृषदि वा मणौ वा लोष्ठे वा बलवति
रिपौ वा सुहृदि वा तृणे वा स्त्रैणे वा मम समदृशो यांतु दिवसाः क्वचित्पुण्यारण्ये शिव शिवेति प्रलपतः स्त्रैणं स्त्रीसमूहः वा
शब्दो भ्रांत्यो द्वयोर्द्वेषो सत्कृत्य [illegible] जातेः [illegible] वदंति शांतो नाम रसस्तावदनुभवसिद्धतया दुरपह्नवः न चैतस्य स्थायी निर्वेदो यु
ज्यते तस्य विषयेच्छा [illegible] लं प्रत्यय [struck] रूपत्वात् तस्य आत्मावमाननरूपत्वात् [struck]
[struck] ही· शांतेऽखिलविषयपरिहा
रजनिता त्मसमात्रविश्रामानंदस्याः दुर्भावमयत्वानुभवात् तदुक्तं यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं तृष्णाक्षयसुख

२ अलंप्रत्ययः हेतत्रयः २ ३ आत्मावमाननं देहाद्यवच्छिन्नेष्वात्मनि तुच्छत्वबुद्धिः तथा च स्तावरूपत्वाभावान्नि

का०प्र०
३३

३ किंरूपः रत्यादीनां रससरूपत्वात् व्यभिचारिणां स्तोगतानियमेन प्राधान्याभावात् सात्त्विकानामव्यंग्यत्वादित्यत आह २

स्मृते नार्हतः षोडशीं कलामिति श्रुत एव सर्ववित्तृष्णाविरामोऽस्य स्थायीति निरस्तं शमावस्य स्थायित्वायोगात् । तस्मात् २

शमोऽस्य स्थायी निर्वेदादयस्तु व्यभिचारिणः स च शमो निरीहावस्थायामानंदः स्वात्मविश्रान्तेः [illegible]

[illegible]ति ॥ रसवत्त्वमात्वोपलक्षणक्रमेणेषु पठितः स रतिर्देवादिविषया व्यभिचारी तथांजितः भावः प्रोक्तः रतिरिति स्थायिभावो

पलक्षणं देवादिविषयेत्यपि अप्राप्तरसावस्थत्वोपलक्षणं [illegible]

[illegible]

[illegible] तेन देवादिविषया सर्वा कांतादिविष

याप्यपुष्टा रतिः हासादयश्चाप्राप्तरसावस्थाः प्राधान्येन व्यंजितो व्यभिचारी च भाव इत्यवधातव्यं । पहुंकं रत्यादि श्लोके

रंगः स्यादेवादिविषयोऽथवा अन्यांगभावभा[illegible]गवास्याभ्रांत दास्थायिव भावमिति । तदेतदाह रतिकारः । कांतादि विष

यालव्यक्ता शृंगारः तत्र देवविषया रतिर्यथा । कंठकोणविनिविष्टमीशते कालकूटमपि मे महामृतं । अप्युपात्तम दृतं भ

वद्वपुर्भेदवृत्ति यदि मे न रोचते ॥ मुनिविषया यथा । हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः । यार रमा

रत्यादिकमुपजीव्य हर्षादिचित्तवृत्तिज्ञानजनितेर्वेद्यमुपजीव्य ग्रामादिप्रवृत्तेः स एव स्थायीत्युक्तः । कश्चित्तु सद्गतिमुनिवचनेरामपदसाधनं लुनिर्वे

दपरमेव अतएवैकोनपंचाशद्भावा इति मन्वादिभिः संगच्छते स्थाय्यष्टकसात्त्विकाष्टकत्रयस्त्रिंशद्व्यभिचारिणामेव भावत्वादित्यस्वरस ×

शान्तं स्यात्त्वपि जन्यत्वे पंचमर्थ्यं

राम
३३

गो

तथानुचितमिदमिति व्यवौ ह्यतोऽज्ञेयं अत्रोक्तं उनायकसंस्थायां मुनिगुरुपत्नीगतायां च बहुनायकविषयायां रतौ तथानुभयनिष्ठायां आभा

सोऽभवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यतौ स्व समवाप्त परियोषा मुन्यादिविषया रतिः स्थायाप्यंतरे वा पुष्ट मुदाहार्य्यं ॥

व्यभिचारी प्राधान्येन व्यंजितो यथा ज्ञाने कोपपरा गुरुर्वी प्रियतमा स्वप्रेः यदृच्छा मया भाभा भातं स्थापाशिनेति रुदती गेहे प्रह स्वा

पुरः नोया वत्सरि रम्य बाहु कशोते राश्वास पामि प्रियं भ्रातस्ताव दहं श्राठेन विधिना निद्रा दरिद्री कृतः अत्र गवि विधिं प्रत्य सूयाप्रा

धान्येन प्रतीयते ॥ तदाभासा अनौचित्य वर्त्तिताः तदाभासाः रसाभासा भावाभासाश्चेत्यर्थः अनौचित्येन प्रकर्षविरोधिना

[illegible]

[illegible] त्यर्थः तत्रैकाश्रयत्वे तिर्यगादि विषयतायां बहुविष

यत्वे व्यभिचारिणामाभासो गतायां वाइष्टं एकविषया रतिरेव नेति तत्प्रलापः वंदीकृत्यन्त पद्ध्वाभिलाषावुदाहरिष्य

णत्वात्तेरसाभासो यथा स्तनमः कंबा माक्षि स्मरमपि विनायेन रसो विलेभेकः प्रायः सामरवमुखेवंगपसे सुलने

कोज्ञातः यधिमुरिव यमालिंगसि बलात्तपः श्रीः कस्ये षामरवनगरिध्यापशितपै अत्र न बहुषु व्यापारोयादाने न बहु

विषयाराति र्व्यज्यते न च तत्र व्यापारस्य बहुविषयत्वमस्ति एकत्रापितादृश व्यापारसंभवात् अनेक कर्मपरावाहा

अनौचित्य वतीभिरेवात्राभासतावीजं तेन पाण्डवेषु द्रौपद्या रति र्न तथेत्यादि कमते

संधेयं ७

67

काप्र०
३५

नमनेकविषयत्वं क्रियायां प्रकरणेत्ति · एकविषयत्वाभिप्राये त्वेकमेवकर्मपदमुपादद्दीतेति · तदुक्तं स्तनयोर्विलेपे इत्यादौ
भिन्नवाक्यस्थानां नेमे कविमतस्येतत्पदोपस्थापिते नान्वयेत द्वयविना अभिन्नस्यापि केक इत्यादिपदे रूपस्थापने भि
कर्मपदेरेवोपस्थापनार्हत्वात् · अत्र ब्रूमः लशब्देन च वयवच्छेदार्थेन व्यापारस्यानेकविषयत्वं लभ्यते · एवमेकत्रैव दामि
प्रायेऽवगतेऽन्यत्रापि तथैवावगम्यते · तदुक्तं यदनेकपदवाच्या भावाभासो यथा · राकासुधाकरमुखीतरलायताक्षी सास्मेर
यौवनतरंगितविभ्रमास्यात् तत्किं करोमि विदधे कथमत्र मैत्रीं तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः ॥ अत्र रते व्यभिचारिभ
तावचिंताऽनौचित्यप्रवर्तिता · नायिकां प्रत्यनुरक्ततया रतेस्तु लक्षत्वेन तदाभिचारित्वोपितत्वात् · एवमन्येष्वपि
हार्याः ॥ भावशान्त्यादिरक्रम इत्यत्र भावशान्त्यादिपदप्रतिपाद्यमाह · भावस्य शान्तिरुदयः सन्धिः शबलता तथा · इति रेके
कालमेवतुल्यकक्षयो रास्वाद्यत्वात् शबलता तु कालभेदेन निरंतरतया पूर्वपूर्वोपमर्दिनोऽनेकभावस्य शबलतायाः कालः
दयास्थानविशेषः शान्तेरुदयस्य वा [illegible] एकैकस्यास्वादेतु इदृशयोपगमात् · तत्र भावस्य शान्तिर्यथा · तस्याः सांद्रवि
लेपनस्तनतटप्रश्लेषमुद्रांकितं किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमा

या

हा

राम
३४

से

हेतुमयासाम्लछाामम् ननतनुसुखवशान्नाय्यापितहि स्मृतं अत्रकोपस्पर्शगतालेवचमत्कार विश्रामः उदयोपप्रथा एकस्मिन्नशाक
नेविपक्षरमणीनाममहे मुग्धयामघोमानवपरिगृहलापितपाचा निकुर्वन्नपि आवेगादवधारितः प्रियतमस्तत्संनीहितस्त
त्सरागान्मान्तस्तु मद्देवे समंदवलितग्रीवं पुनर्वीक्षितः अयोस्तु कयस्योद्धर्षसंविधेयाः उत्तिकस्पतपः पराक्रमनिश्चेर भागम
देकतः सत्संगप्रियतमावबीररभसोत्फालश्रमांकर्षितः वैदेही परिरंभ एव वसुहृश्चेतन्यमामीलयन्नानंदी हरिर्वे दृष्टि
शिरस्वर्गोरुणाध्यन्यतः अत्रपूर्वार्धसंस्तमात्तकस्मावेगः उत्तरार्धे हर्षः अनयोस्तुल्यकालमेवास्वाद्यत्वं लतायथा
र्ककार्यशालस्मरणः कुचकुलंभयोपिदृश्येतसादेनाम्नांप्रशमायवः कृतमहो कोपि पिकांतमुखं किं वक्ष्ये वपक्षक
बाः कृतग्नियः स्वप्नेपि स्याद्दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु पुवाग्न्योमरवासयति अत्र क्षाकाम्यमित्यादौ वितर्कः
मृग्योवीत्योस्तुकं दोषाणामिति मतिः कोपिपीतिस्मृतिः किं वक्ष्यतीतिशंका स्वप्नेपीतिदैन्यं चेतः स्वास्थ्यमितिधृतिः कः खलु
त्वितिचिंतास्तु इंपर्वपूर्वीममर्दनमती यमानाशवलताचमत्कारभूमिः ननुभावस्यधान्त्यादिवत्तस्थितिरपि प्रकार संभव
लेव नलक्षणे नो क्रमतिचेत् नभावोक्येवाचकः भावस्थितेर्भावाभिन्नत्वात् ननु भावसंधिवारिस्थलेनिपमतामुखस्यपरस

का॰प्र॰
३५

स्यावस्थानं॰ तत्रायं भावोदाहरणमेतत्॰ कथं वामा वस्तुनिर्भरं संगत्वेन तेषां गुणीभावादित्यत आह हेतुत्वेन सेपितैः गितं स्या
प्रुवेतिकराचनते भागशांत्यादयः कराचनं घटात एवांगित्वेन विवक्ष्यंते॰ विवहनमरुत्तराज्ञानुगम्यमानभूतस्य वस्तु॰। एवमसंलक्ष्य
क्रमव्यंग्यभेदं विविच्य संलक्ष्यक्रमव्यंग्यप्रभेदानाह॰ अनुस्वानाभसंलक्ष्यक्रमव्यंग्यस्थितिस्तु यः शब्दार्थोभयशक्त्युत्थे
क्रमव्यंग्यभेदं द्विविधं लक्ष्यक्रमव्यंग्यप्रभेदानाह यथा सोरी यानपरोनुरणनानुरूपः शब्दः प्रतीयते तदा स्ले
त्रिधा स कथितो ध्वनिः॥ घंटायां हन्यमानायां सुरवमनवरतं यथा अनुरणनं तथैव तेन शब्दशक्तिमूलव्यंग्यः अर्थशक्तिमूलव्यंग्यः उभ
लक्ष्यक्रमव्यंग्यस्य स्थितिर्यत्र सः शब्दस्यार्थस्य च उभयोर्वेति हेतुः तेन शब्दशक्तिमूलव्यंग्यः अर्थशक्तिमूलव्यंग्यः शब्दैकय
यशक्तिमूलव्यंग्यस्त्विति त्रिधा सर्वः शब्दशक्तिमूलत्वे वैतरेव॰ यत्रैवेव शब्देनतद्दर्थप्रतीतिर्न तु पर्यायान्तरेणापि॰ शब्देय
रीत्यं चार्थशक्तिमूलत्वं॰ न त्वभिधया तत्प्रतीतिरिति एतेनाभिधाया यत्रन नियमनं तत्रैव भेदो दृष्टव्यः न तु नियमने तना
भिधामूलत्वं किंतु व्यंजनामूलत्वमेव महात्मन इति वतमवेदितिय लकेन विदुक्तं॰ तन्नादेयं॰ महात्मन इत्यादेरर्थान्तरे
दत्वेन दृष्टत्वात॰ अन्यथा तस्य सर्वभेदबहिर्भावापत्तेः किंच प्रथमोदाहरणे प्राकरणिकाप्राकरणिकयोरिति व्याख्याने न
द्वितीयेऽभवानित्यनेन॰ तृतीये असौ सन्नेन प्रकरणस्याभिधानियामकस्य स्पष्टत्वात् तेनामुदाहरणत्वं विरुद्धमेतत् स्माच्च

राम
३५

70

योक्तमेव न्याय्यं तेषु मध्ये अलंकारोऽथ वस्त्वेव शब्दाद्यत्रावभासते प्रधानत्वेन सङ्क्षेपः शाब्दश्चार्थत्वमुद्भवो द्विधा । शब्दशक्तिमूलो
नुरणनरूपव्यंग्यो द्विधा । अलंकृतस्यानलंकृतवस्तुमात्रस्य वा प्राधान्येन प्रकाशनादि तत्र्यर्थः । तत्राद्यो यथा । उल्लासस्य कालक
बालमहांबुवाहं देवेन येन जरठोर्जितगर्जितेन निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः । का
वेरिसिंहस्तोयदः करवालस्य एव महदंबुधाराजलं वहतीति महांबुवाहः पक्षे महत्त्ववः स एवांबुवाहः गर्जितं सिंहनादः अत्र क
रवालस्योल्लासस्येतावन्मात्रेव क्रमेघेदेनादृश्यशब्दप्रयोगस्तस्य सर्वस्यार्थकत्वेमाप्रस्तुतमितिसमाकरणिके रिंदुकारिवाहा
ति प्राकरणिकानां राजकरवालादीनामुपमानोपमेयभावे कवेस्तात्पर्यमिति उपमालंकारो व्यंग्यः । स च शब्दशक्तिमूलः ।
पर्यायांतरेणाभूयास्मिन्नतदर्थोपस्थितौ तत्प्रतीतेः एवमन्येऽप्यूह्यं एवमलंकारांतराण्यपि । यथा । तिग्मरुचिरप्रतापो वि
धुरनिशाकृद्विभो मधुरलीलः मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान् । अत्र तिग्मरुचिः अप्रतापः एवं क्रमे
णैकैकपदस्य द्विपदत्वे विरोधाभासः पदाभेदेऽपि विरोधाभासो यथा । अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो । अहितः सहितः
साधुयशोभिरसतामसि नु विरोधस्य किं सर्वत्र व्यंग्यत्वमेव नेष्यते । तत्किं फलीसीमा । अपि शब्दादेर्विरोधद्योतकस्य

समितः २

का०प्र०
३६

भावेवाच्यत्वंतदभावेव्यंग्यत्वमितितन्निरूपणादलंकारमनिरूप्यैवेवतद्वतोलगद्धितुं नमस्तस्मैकलाश्लाघ्यायश्लिनैविचित्रं नाना
कारमालेख्यं चाकलाचं इत्यपोऽष्टोमभः कौशलंव · अत्र उपादाने भित्तावालेख्यकारिण्यः कलावच्यः श्लिनोव्यतिरेको
व्यंग्यत्वं स्यापिचित्रकलाशब्दयोः परिहृत्य सहत्वेन शब्दश्लिष्टमलंकारान्तरं दत्वेतेषूपमानादीनां प्राधान्येनवा · अप्राधे कुत
स्तेषामलंकारत्वं अन्यानलंकारणात् · द्वितीये कुतोस्यकाव्यस्यध्वनित्वं · व्यंग्यस्याप्राधान्यादितिचेत् · नपूर्वमप्यलंका
रत्वासीदित्येतावतालंकारव्यपदेशात् · यथा ब्राह्मणपूर्वमोऽद्यलं न्यासिनिवास्त्रण्यव्यपदेशः नचैवंव्यपदेशसमर्थनेपि
अलंकारध्वनित्वेन समर्थितमितिचेत् · न · अलंकारपदेनतद्योग्यतयाविवक्षितत्वात् · नचैवं रसादिध्वनावपि अलंकार
ध्वनित्वप्रसंगः संलक्ष्यक्रमस्यैवतादृशस्यतथाभिप्रेतत्वात् वस्तुनस्तु प्राधान्यमप्राधान्येव्यंग्यस्यवाच्यापेक्षयैवनतु
रसापेक्षयापि · तदपेक्षयातुगुणीभावात् · तथाचोपमादीनां रसांगतयालंकारत्वं · वाच्यापेक्षयाप्राधान्येचेतिनदोषलेशा
वकाशः वस्तुमात्रं यथा · पंथिअणएत्थसत्थरमत्थिमणंपत्थरत्थलेगामे · उण्णअपओहरंपेक्खिअउणजइवससि
सितावसतु अत्र यद्युपभोगक्षमोसितदास्वेतिव्यज्यते · तत्रपयोहरेतिशब्दश्लिष्टमिति · तथाचवाक्यानिरपेक्षमनुद्दे

रा०म०
३६

72

र्विहंति कुप्यसि नरेंद्र यस्मै त्वं यस्य प्रसीदसि पुनः स भात्युदारः ॥ अत्र यमार्द्वेशा निरपेक्षो नित्यमेव विरुद्धावपि स्तुव
र्तेनार्थमेकं कार्यं कुरुत इति ... च्छन्ते । तत्तु विरोधालंकारः । अत्र निग्रहानुग्रहयोः सामानाधिकरण्याभावात् । विरोधस्य वतस्तथैव वि
ध्यानेः द्वितीयार्द्धे तु नोदाहरणान्तरे च शब्दस्यापि विरोधस्य वाच्यत्वात्समुच्चयमात्रार्थत्वेन विरोधस्यैव व्यंग्यत्वादिति । अर्थ
शक्तिमूलानुरणनरूपव्यंग्यं विभजते । अर्थशक्त्युद्भवोप्यर्थो व्यंजकः संभवी स्वतः प्रौढोक्तिमात्रात्सिद्धो वा कवेस्तेनोंभित
स्य वा । वस्तु वालंकृतिर्वेति षड्भेदोसौ व्यनक्ति यत् । वस्त्वलंकारमथवा तेनायं द्वादशात्मकः । स्वतः संभवी न केवलं भणितिनिष्पन्न
शरीरः अपि तु बहिरप्यौचित्येन संभाव्यमानः प्रौढोक्तिमात्रात्सिद्धः बहिरसन्नपि कविप्रतिभामात्रेण तथा निर्मितः । अयमर्थः
व्यंजकोर्थस्त्रिविधः स्वतः संभवी कविप्रौढोक्तिमात्रसिद्धः कविनिबद्धनायकादिवक्तृप्रौढोक्तिमात्रसिद्धश्च स त्रिविधोपि वस्तु
मात्रमलंकृतिर्वेति षड्भेदो व्यंजकः । एषां व्यंग्यमपि प्रत्येकं वस्तु वालंकृतिर्वेति द्वादश प्रभेदा भवंति । तत्र स्वतः संभविन्यर्थभेदे
वस्तुना वस्तुनो व्यक्तिर्यथा । अलसशिरोमणि धुत्ताणं अग्गिमो पुत्ति धणसमिद्धिमओ । इअ भणिएण णअंगी पप्फु
ल्लविलोअणा जाआ ॥ अलसत्वेनान्यत्र गंतुमनिच्छुः धूर्तत्वेन रतेषु अनाहतप्राणः संभोगेनात्मरसः धनसमृद्धिमत्तया कृपणाः

काप्र०
३८

सुखीत्यइति निर्दिष्टायि यत् फुल्लनयनत्वं वस्तु तेनान्यासंभाव्यमानाकर्णरागीय इति समं मेवोपभोग्य इति वस्तु व्यज्यते॥ वस्तुनाऽ
लंकारस्य यथा॥ धन्यासि या कथयसि प्रियसंगमेपि विस्रब्धचाटुकशतानि रतांतरेषु नीवीं प्रति प्रणिहिते तु करे प्रियेण स
ख्यः शपामि यदि किंचिदपि स्मरामि॥ अत्र वाच्येन वस्तुना त्वमधन्या अहं तु धन्येति स्वस्य व्यतिरेकालंकारो व्यज्यते॥ ननु व्य
कोधन्यासीति त्वत्सकाशे स्य व्यतिरेकालंकारस्वतत्कथं वस्तुव्यंजकोदाहरणमेतदिति [illegible] चेत॥ न॥ स
बोध्य व्यतिरेकस्यावन्तवाच्यः। आत्मनिकथनाभावस्याराव्द्त्वात्॥ [illegible] वस्तु यद्यपि भवत्येव तथापि तमनपेक्ष्यैव वाच्येन व
मात्रेणायं त्वर्द्व्यतिरेकव्यंजनादिति॥ अलंकारेण वस्तुनो यथा॥ दर्प्यांधगंधगजकुंभकपाटकूटसंक्रान्तिनिघ्नघनशोणित
शोणशोभौ॥ वीरैर्व्यलोकि युधिकोपकषायकांतिः कालीकटाक्ष इव कपाणे॥ अत्र कालीकटाक्ष इव कृपाणेत्युपमालं
कीत्युपमानेपुनरुक्त्यासंभावनाविरहात्॥ तथा [illegible] चस कलरिपुक्षयः क्षणात्करिष्यति इति वस्तु प्रकाश्यते। अलं
कारेणालंकृतेर्यथा॥ गाढकांतदशनक्षतव्यथासंकटादरिवधूजनस्य यः॥ ओष्ठविद्रुमदलान्यमोचयन्निर्दिशन्युधि रुष
निजाधरं॥ अत्र निजाधरदशनैवेरिवधूजनोष्ठदशनव्यथामोचनयोः कारणकार्ययोः पौर्वापर्याभावलक्षणा

राम
३८

पायोक्त्यालंकारेणादृष्टान्तसमकालमेवपात्रबोध्यापादिताइतिसमुच्चयोसोसलन्योप्युगपद्यागुणक्रियाइत्यकलक्षणः
समुच्चयालंकारोद्योत्यते॰ एवमेवतुल्यकालंयोगितेतितित्सुत्वल्पातुल्ययोगितापदेनकेचिद्दुच्यते॰ ममक्षतायाप्यन्यस्यक्षतिर्मि
वर्त्ततामितितुहेतुत्वेक्षणाद्युत्प्रेक्षाप्यत्रमंगप्रथमेतुव्यंजकोर्थः स्वतःसंभवीकेविप्रोटोक्तिसिद्धेव्यंजकेर्थेभेदवलक्षण्येव
स्तनोव्यक्तिर्यथाकेलासस्यप्रथमशिखरेवेणुसंमूर्छनाभिः श्रुत्वाकीर्त्तिविबुधरमणीगीयमानांयदीयांस्रस्तापांगाः
सरसविसिनीकांडसंजातशंकादिङ्मातंगाः श्रवणपुलिनेहस्तमावर्त्तयंति॰ अत्रमधप्तिविसिनीकांडसंजातशंकाइति
भ्रांतिमान्ससंदेहोवालंकारोव्यंजकइतिवस्तुनात्रव्यंजकत्वोदाहरणत्वमयुक्तं॰ तथापितद्भ्रांतेनैरपेक्ष्येणापिकिंचिदुत्
त्कंकरोमिविश्रांतीत्येतावतापिवस्तुमात्रेणाव्येतामप्यर्थाधिगमोनास्तितेनामप्येवंव्यंजवेत्युत्तरेत्वादित्युद्भिन्नवेन्नवलंकीत्वि
श्चमत्करोतीतिव्यक्तिसंभवाद्वस्तुमात्रोदाहरणत्वमुक्तं॰ अत्रवकीर्त्तिः श्रवणानंतरंकर्णोहस्तवर्त्तनेहस्तिनोनस्वतःसंभ
विकिंतुकविसंप्रदायात्कविनावर्णितमितिकविप्रौढोक्तिसिद्धत्वं॰ एवमग्नेपिद्रष्टव्यम्॥ अत्रेववस्तुनात्रालंकारस्यपथा॰
केसेसुवलामोडिअतिणसमरहिमिजअसिरीगहिआजहकैंधराहिविहुरांतस्संहट्ठंकेठअहिमिसंहविस्तोञ्चत्तेनतपा

का०प्र०
३८

समरेकेशेषुजयश्रीर्गृहीताः यथातस्यारयः कंदराभिः कंठेस्थापिताः इतिवस्तुना एकत्रैव संग्रामे विजयदर्शनात्तस्यारयः
पलाय्य गुहासु तिष्ठंतीति कार्यलिंगेन पलाय्य गतास्ते वैरिणः किं तु तः पराभवसंभाव्य कंदरा एव तान् रक्षंतीति अपह्नु
तिश्च व्यज्यते । यत्तु केश्यग्रहणावलोकनोद्दीपितमदना इव कंदरास्तद्विधुरान् कंठे गृह्णंतीत्युत्प्रेक्षात्र व्यज्यत इति तन्न अवैद
ग्ध्यादिपूर्वकं दरादीनां यिकात्वाध्यारोपः स्यात् । अन्यथा केशग्रहणात्स्मरोद्दीपकत्वायोगात् । न च दृष्टुणामेव तत्वस्तुमा
त्रस्य व्यंजकत्वं । किं तु समासोक्तेरलंकारस्यात्रैवालंकारेण वस्तुनोपयोगान्नालिंगनाहस्तुस्मिन्नेव इष्टएवहुः समासोस

मा

रइमाणं सिरणीणं माणो पीडन्नमीरुह्वाहिअग्गाइं अत्र पीडनलीलाइवेत्युत्प्रेक्षया लंकारेण मन्त्वालिंगनादि तत्र अन्ये मत
इतिवस्तुव्यज्यते । तेनैवालंकारेण लंकारस्य यथा गाढेरेवंहसंती कइव अग्गाणुरूहवद्धविण्णिवेसा । दावेइ भुवणमंडल
मस्सं विअ जअइ सा वाणी ॥ अत्र गाढेरवहसंतीत्युत्प्रेक्षयालंकारेण वमलकारेककारणं नवैनवेजगद्वुज्जासनानिर्मिमी
त इति वाण्या ब्रह्मणो व्यतिरेकः प्रकाश्यते । यद्यपि उत्प्रेक्षायां भिन्नापि व्यतिरेको यं प्रकाशते । नियतिकृतनियमेत्यादिवत् ।
तथापि न स्फुटो भवतीति । यद्दातोवन्मात्रस्य व्यंजकत्वेप्युत्प्रेक्षायाश्च अपि व्यंजकत्वं न विहन्यत इति कविनिबद्धवक्तुः प्रौढो

राम
३८

क्रिमात्रसिद्धव्यंजकार्थस्यच्चेनेर्भेदत्वलक्ष्येवस्तुनावस्तुनोव्यक्तिर्यथा जैसेकागिरिमेहलासुरवलिस्रांसंतोस्रविस्मी
रईफारप्फुल्लफरागवलीकवलनैपप्रादरिहत्त्रंगंतिरहिं मलअम्मारिणलोविरहिणीणीसाससंपक्किणोंजाआसमे लिस्स
न्नरोधिबहलेताहरूस्सपुस्माविरअत्रयथोक्तेनवस्तुनानिश्वासेनमत्तेश्वर्याः मलयानिलाः किंकिंनकुर्वंतीतिवस्तु
व्यज्यते· ताहरुस्सपुस्मावि रस्यस्यव्यक्तावनुपयोगात·नचैवमस्याप्रयोजकत्वंउक्तिविशेषपरिपोषकत्वात·निश्वास
संपर्कस्यबहलत्वहेतोरूपादानात्तकाव्यलिंगस्येवव्यंजकत्वमितिवेत·नतस्यहेतुत्वाविवक्षायामपितथात्वस्याक्षतत्वात्रैवबस्तु
नाअलंकारस्ययथाससिहिविरइआ माणस्स महुअलधीरत्तणेणअग्गोत्रासं पिअदंसणविहलसरवणम्मि संत्रितेण सह
अग्गोलदिअं अत्रप्रियदर्शनविहुलत्वसलोधीरत्वेनायसुतमितिवस्तुनाअक्ततेपिमानिनेमप्रसन्नेतिविभावना· तूने
प्रियदर्शनसौभाग्यबलेधैर्यमासोढुं नशक्यतइत्यपेक्षावव्यज्यते·तत्रैवालंकारेणवस्तुनो यथा उल्लोल्लककरन्नरअ
णरखरहिंतहलोअरोसुमहाद्दिसंगरत्तं स्सअंपसाहंकोवेणपुणोइमेणाअक्कमिअं अप्पत्ति लोचनेकुपितेवह
सीतिप्रश्नोत्तरालंकारेणकोवेणपुणोइमेणाअक्कमिअंइत्यपक्नुतलंकारसहितेनचकेवलमाईल्लतानि

काप्र०
३८

गोपयसि किं तु तेषामहं प्रसादपात्रं जातेति वस्तुना व्यज्यते ॥ अत्रैवालंकारेणालंकारस्य यथा ॥ महिलासहस्सभरिए
तुह हिअए सुहअ सा अमाअन्ती । अणुदिणमणण्णकम्मा अंगं तणुअं पि तणुएइ ॥ अत्र महिलासहस्रभरिते त्वद्धृदये
स्थानेन लभ्यते · ततोऽङ्गं तनु अपि तनयतीति हेत्वलंकारान्तिमा तोऽस्तनूकरणेऽपि तव हृदये न वर्तत इति विशेषोक्तिः ॥ अत्र क
विशिक्षासरस्वतीवर्णा · एवमर्थशक्त्युद्भवस्य द्वादश भेदाः ॥ वाच्यार्थोभयशक्तेरेको यथा · अतन्द्रचन्द्राभरणा समुद्दीपितमन्म
था · तारकातरला श्यामा सानन्दं न करोति कं ॥ अत्र श्यामारूपकामिनी विशेषणान्योन्यरूपमाव्यंग्या · सा यातेइ चन्द्र इत्यादेः
परिकस्य सहृतया समुद्दीपिते स्यादेः सत्त्वसहृतया उभयस्यापि व्यंजकत्वे न वाच्यार्थोभयशक्तिमूलो भेदः अष्टादशास्य

त्या

तत्रैव स्पष्टत्वनैः ननु शब्दार्थोभयमूलस्य चतुरसभावादीनां बहुदशाद्दशत्वमनुपपन्नमित्यत आह रसादीनामनन्तत्वाद्
दस्को हि गणयितुं शक्यम् अनेन लक्ष इत्ये · नव रसास्तत्र शृङ्गाररस्यैव द्वौ भेदौ · संभोगो विप्रलंभश्च · तत्र संभोगस्यापि पर
स्परालिंगनादयो बहवो भेदाः विप्रलंभस्याभिलाषादयश्च तयोरपि विभावानुभावव्यभिचारिवैचित्र्येणानन्त्यं नायिका
नायकयो रूपमध्यमाधमप्रकृतिकत्वे · तत्रापि देशकालाद्यवस्थाभेद इत्येकस्यैव रसस्यानंत्यं का गणना सर्वेषां कु तस्मा

सम
३८

श्रि

ष्ठैकत्वेन गतार्थं· असंलक्ष्यक्रमत्वरूपमेकं सामान्यमाश्रित्य वाक्येषु प्रोक्तः शब्दार्थोभयशक्तिमूलो ध्वनिर्वाक्य एवेत्यनुक्त्वा
यं नियमः शिशुपालवधे तद्दृष्टतो क्रोममुव्वेपि दर्शनादित्येवं तत्रोभयशक्तिमूलत्वेपि ध्वनित्वाभावात्· तुल्यप्राधान्यात् ब्राह्म
णातिक्रमत्याग इतिवत्· अन्यत्राप्येवं संभाव्यत इति चेत् संभाव्यतां· नत्वक्वापि निश्चीयते येन तदादाय विभागः स्यादिति
॥पदेप्यन्ये अन्ये सप्रदश भेदा ध्वनिभेदा वाक्ये पदेपि· ननु पदस्य व्यंजकत्वे किमायातं वाक्यरूपस्य काव्यस्य ध्वनित्वेन कथं वा
पदमात्रस्य व्यंजकत्वे वाक्यस्यैव समस्तस्य चारुतेति चेत् उच्यते· पदमकाव्यत्वेन पदमात्रस्य व्यंजकतया किं तत्स्य प्र
धान्येनाविवक्षितवाच्येपि पदमात्रस्य व्यंजकत्वेपि यद्वाक्यवर्त्तिपदस्यार्थस्य वाक्यस्यापि प्रतिपादिताव्यंजकत्वं
वाक्यस्यैव ध्वनित्वमित्यभ्युपगमात्मकश्चिद्दोषः। एकदेशस्थितेन त्वलंकारापदेन समस्तमेव वाक्यं चारुतामुपगच्छतीति
कामिनीवैकावयवस्थितेन भूषणेन· तदुक्तं ध्वनिकृता· एकावयवसंस्थेन भूषणेनेव कामिनी· पदद्योत्येन सुकवेर्ध्व
ना भाति भारतीति· न त्र वाक्यव्यंग्यमुदाहृतं· पदव्यंग्यमुदाह्रियते· तत्राविवक्षितवाच्यभेदयोरर्थान्तरसंक्रमितवाच्य
या· यस्य स्वमित्राणि मित्राणि शत्रवः शत्रवस्तथा· अनुकंप्योनुकंप्यश्च स जातः स च जीवति· अत्र द्वितीयो मित्र· पद

काप्र॰
४०

गौ३

आख्यस्तत्वे॰ शत्रुशब्दोनिंद्ये अत्र बाले॰ अनुकंप्यशब्दः स्नेहपात्रविशेषे संक्रमितवाच्यः नायकस्य दृष्टिगमकत्वं व्यंग्यं॰
नुत्वामस्मिवचस्मि विदुषामिति वाक्यप्रकाश्यपर्यवमुसाह्व्यंते तस्मादस्य पदप्रकाश्यस्य को भेद इति चेन्न॰ अत्र नुवचोधात्वं तद्वि
प्रत्येकपदव्यंग्यमभिन्नं समस्तवाक्यस्य व्यंग्यं तस्मादत्र सर्वथा सावधानेन भाव्यमित्येवं रूपं पतत्परं॰ इदं न केवलं मि
द्विपदव्यंग्यमात्राभिप्रायमिति॥ अलंकृतिरस्तु नवा व्यंग्यथा॥ खलव्यवहारादृष्टीसंतिदारुणा रागे महविनिहविधीरां
हि॰ अत्र अस्य वहुमन्नारागहुवचसा आधिमुक्तिमिति अत्र विमोहेनामवृत्तिर्लक्ष्यते नचतत्रवाच्यस्य कथमपि प्रवेशः इष्टकार्य
कारित्वं व्यंग्यं यद्यपि व्यवसाये विमोहाभावो नाम पायोगपद्यतिकुतो लक्षणा॰ तथापि धीराणामधीरेभ्यो वैलक्ष्यं
प्रतिपाद्यं॰ नचतल्लक्षणां विना संभवति॰ अधीरव्यवसाये विमोहाभावादित्य व्यंग्यं लक्षणास्त्री कार्या अलक्ष्यक्रमव्यं
यथा॰ लावण्यं तदसौ कांतिस्तद्रूपं स वचःक्रमः॰ तदा सुधास्पदमभूदधुना तु ज्वरो महान्॥ अत्र यत्र वस्य संस्थानसौष्ठवं
रूपं॰ अवयवेनसक्तं तदेकत्राव्याप्तेः॰ कांतिरुज्वलता॰ अत्र विप्रलंभे व्यंग्ये॥ अनुभवैकगोचरमर्थं प्रकाशयंतीति तदादिपदानां प्रा
धान्यं॰ एवमन्यत्रापि॰ न केवलं सर्वनामपदानामेव रसादिव्यंजकता किं त्वन्येषामपि॰ यथा मुग्धे मुग्धतयैव नेतुमखि

राम
४०

८०

लः कालः किमारभ्यते मामं घस्त्वद्य इति वचनान्तरमुक्तं दूरे कुरूपे यसि॥ स्वस्थे वंश प्रतिबोधिता [illegible] प्रतिवचनमाह भीत
न नानी वैः शंसतहृदि स्थितो हि नतु मे प्राणेभ्यः श्रोष्यति॥ अत्र भीतानने इति पदं नीवैः शंसन विधानस्य पुरुषो प्रकाश
यत्प्राधान्येन यगाति शाघव्यंजयति॥ भावादीनां लक्षणमपिनताहृशे वाहतत्वे। पद्मकाश्यपलेस्ततरो। अतः नतत्वमेदा
दाक्षिण्यंते लस्यक्रमव्यंग छविनिप्रभेदेषु राहराक्रिमूले ऽलंकारव्यक्तिर्यथा॥ रुचिरविसरसमसाक्षितकरवालकराल
रुविरभुजपादपः॥ स्फुरिति भ्रुकुटि विटंकितललाटपट्टो विभाति नृपभीमः॥ अत्र भीमेति भीषणीयार्थेन नृपविशे
षो न भीमसेनोपमायस्यते॥ अत्रैव वस्तुनो व्यक्तिर्यथा॥ भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः॥ कस्य नाम न दनिस्यं
विदधाति सरागमः कोविदो के तदापि। न मेवं मुखमप्याहस्यार्थं स इति तत्र सरागमय हेन स्फुतिर्व्य स्यते॥ उभयोर्व्यक्तयो
रुद्रप्राधान्ये परिवृत्य सहत्वात्॥ अर्थशक्त्युद्भवेनुस्वतः [illegible] संभविन्यर्थे व्यंजके वस्तुना वस्तुनो व्यक्तिर्यथा॥ सार्थं त्रा
न मुष्यान्वितमलयजेनांगसमालेपितं यातोस्त्वाचलैर्मौलिमेवरमहि [illegible] विस्मृतमत्रागतिः॥ अत्र स्वयं गतवत्सो कुमार्यन्ना
नाः क्रांतासि येनाधुना नेत्रं हंहममीलनत्व निकं व्यक्तो जितेनासितं॥ अत्र तत्र वत्सो कुमार्यमाप्स्वयं येनाधुनाक्रांतासी॥

का०प्र०रत्ना
४१ द

वस्तुना कान्तयरपुरुषपरिचयात्क्रान्तासीति वस्त्वधुनापदप्राधान्येन व्यज्यते । वस्तुनालंकृतेर्यथा । तदप्राप्तिमहादुः
खविलीनाशेषपातका । तच्चिंताविपुलाह्लादक्षीणपुण्यचया सती ॥ चिंतयंती जगत्सूतिं परब्रह्मस्वरूपिणं । निरुच्छ्वासत
या मुक्तिं गतान्या गोपकन्यका ॥ गुरुमके जन्मसहस्रेरुपभोग्यानि दुःकृतसुकृतयोः फलानि । वियोगदुःखचिं
ताह्लादाभ्यां कपाप्यनुभूतानीत्यर्थः । एवं च दुःकृतसुकृतराशिताराभ्येनाधववस्तितौ भगवद्वियोगदुःखचिंताह्लादौ मत्वा
चेते इति निगीर्याध्यवसानरूपातिशयोक्तिः इयमेवोपचयपरपर्यायो व्यज्यते अलंकारेणाव वस्तुनो व्यक्तिर्यथा ॥ लक्ष्मणादासा व
लक्ष्मणादावन्यमवने व्यसनमध्यसनं वातवीरस्तव द्विषतां परा सुखे त्वयि पराङ्मुखे त्वयि पराङ्मुखं सर्वे [illegible] पराङ्मुखे त्वयि पराङ्मुखं सर्व
मित्यर्थान्तरन्यासेन । विधिरपि त्वामनुवर्तत इति वस्तु प्राधान्येन व्यज्यते । ननु नायमर्थान्तरन्यासः । वने रक्षकमित्यादेर्व
च्यस्यार्थस्यानुपपादकत्वादिति चेत् । न [illegible] दृष्टान्त्यस्य लक्ष्मणाद्यरण्यादाभिन्नेति विरोधस्योपपादकत्वेन तत्त्वात्
त । अलंकारेणालंकारस्य यथा । [illegible] हस्तगोसमिन्या सिअहरो मिलानकमलदलोइ अच्छाववहुव्वा सो ऊणा केर
इव अरणा महीसमुहे अवनत्ता [illegible] नकमलदलमिति रूपके नालंकारेण त्वयास्य मुहुर्मुहुश्चुंबने कृते तेन तस्य ॥

राम
४१

त्रि

नत्वमिति काव्यलिंगमिति लाक्षणिकमत्वदपदेन प्राधान्येन द्योत्यते॥ अथ कविप्रौढोक्तिमात्रनिष्पन्नशरीरेष्वलंकार्येषु वस्तुना
वस्तुव्यक्तिर्यथा। राईस्तुवं दृष्ट्वा लाकलिअमयण्णालिऊणानो वावं एक्काछिन्ने विब्भकुणइ तिहुअणरज्जं विब्भमे तो
अत्र वस्तुना येषामसौ स्मरो राजा तेषु मध्ये न कश्चिद्रवितरदा देशपरामुखं इति आगच्छितरूपभोगपदेरोनि शातिवा हृत
इति वस्तुनो भुवनराज्यपदेन प्राधान्येन व्यज्यते। अथ खंडानाविषयो हि राज्ये इत्यावणनव्यंजनोपयोगी प्रत्युत त्यादिदुत्या नि
श्वयोगस्यते। वस्तुनालंकृतेर्यथा। निशितशरधियार्पयत्यनंगो दृशि सुदृशः स्वबलं वयस्यराले। दिशि निपतति स व
यत्र तत्र व्यतिकरमेत्य समुन्मिषंत्यवस्था॥ अत्र व्यतिकरमेत्यावस्थाः समुन्मिषंतीति वस्तुना परस्परविरुद्धा अपि
वैदोन्माहादयो ऽवस्था भवंतीति विरोधालंकारो व्यतिकरपदेन प्राधान्येन व्यज्यते। अलंकारेण वस्तुनो व्यक्तिर्यथा। रि
तेति विपुलासदावक अच्छिएक्काहिअ एरांधरणाहरवस्सस्तए रंगविसद्गाई राव लहसेहारी। अत्र नखनभाखवयस्येन नि
शुद्धज्ञातिखातनहारो नवलती छिहेत्वलंकारेण अनवरतं कंपमानस्य बहारोस्तीति वस्तु नवलतीति पदेन व्यज्यते। अलंका
का रेणालंकारस्य यथा। सो मुद्धसामलंगो धम्मिल्लो कलिअललिअणिअदेहो। तीए खंधाहि बलं गहिअ सरोसुरअसं

कां॰प्र॰
४२

गरैजन्मद्रुं अत्रस्मरतसंगरेधन्विनृत्वः स्मरइति रूपकालंकारात्म्यां तस्याकेस्याघातः स्कंधेपर्वतो यथा रतिविरतावधि निष्टं

छः कार्मुकोऽमृदितिविभागेना स्कंधपदप्राधान्येन समस्यते अत्र कविविवक्षावरूपेणे छिमात्रनिष्पन्नशरीरस्यानुकार्य

धनिनेदेषुपदप्राधान्येनवस्तुनावस्तनो अस्मिन्ये याः प्रागवपुस्मिन्नत्तिरत्रेके स्तनस्तुरूपस्पर्कोतेसि नयुसमयेम हस्तेकासो

हगासमगा पश्चोस्तरस्य रसिाद्भलहस्य यथोलेनेवस्तुनास्यान्यस्यानुपमयमनमनुरक्तस्वनत्वनेतइति वस्तु

नां वपुस्मिमानिमित्रकपश्चोस्तरम्मणीपदप्राधान्येन च्छोलतेअत्रपदे रजनीवेसुपमानने रूपेस्यैगाकधेनजकत्वा

तितिं त्वं अत्रैववस्तुनाअलंकारस्य यथा सहितासवशिशुवणा समरहितत्रैकवालीसहीशारविजसहारोरिगावारि

अबोधि अत्रउबैरतौतदोकहेर मित्रत्रैअत्रनिभ्रुवनसमरइतिरूपकस्यव्यंजना यामम योजकत नयावाच्येनवस्तुमात्रेण

हारच्छेदानंतरं प्रोठंगनारता हिलस्यणांचवो हापास्तेरतम्भतनुलक्ष्यकी दगितिव्यतिरेकालंकारः कहे पद्मकाश्यपः ॥

अलंकारेणावस्तुनो यथा धविसीती घरवारैविवलि अवअणोयलोइउअणं पहरिंवधाघे न्हूणं व डेहारणबोत्विरूत्र

सिंसहिंकिंति अत्रनष्टइति शोदिर्भीति हेत्वलंकारेण संकेतनिकेतनंगच्छन् कामुकं दृष्ट्वापदिगोलमिच्छसि तत्दपरं ८

ति

राम
४२

गृहीत्वा गच्छेति वस्तुतः किं नि पदप्राधान्येनानुप्रकाश्यते । यथा वा । विहलंखलं तुमं सहि दट्ठूण कुडेण [illegible] तरलतरं [illegible] दिट्ठिं वारप्फंस
मिसेणाप्पणो अअप्पाणस्सौत्तिपाडिअं विहिसेमे । अत्र नदीकूले लतागहने कृतसंकेतमप्राप्तं गृहप्रवेशसमये [illegible] आदागतं कामुकं दृष्ट्वा पु
नर्नदीगमनाय बुद्धिपूर्वं हारस्पर्शव्याजेन त्वया घटः स्फोटित इति मयावगतं । तत्समाश्वासं विधाय सखी हि तां सह्येव व्रज । अहं तव
श्वश्रूनिकटे सर्वं समर्थयिष्य इति वस्तुतः हारस्पर्शमिषेणाप्पणो [illegible] वारयंति समिसेणोत्तिपदेन द्योत्यते । अलंकारेणालंकारस्य
यथा । जो राहाए महुरसेणां अविरस्सनतासत्ता उस्सुप्पमरणसा बुद्धाविणावो ढब्बं परवहू स्सां अ [illegible] हर इहहहिम [illegible] परवधूत्वेन
सा तव तद्दर्पं हरतीति काव्यलिंगालंकारेणास्मासु उक्तो त्वायुष्ट्वा परवधूमभिलषसीति त्वदाचरितं वक्तुं न शक्यत इत्याक्षेपालंकारः ॥
प्राधान्येन परवधूपदद्योत्यः प्रकाश्यते । शब्दार्थोभयशक्तिमूलस्तु पदप्रकाश्यो न भवति । तत्र वाक्यस्यैव प्राधान्यात् । एवं पंचत्रिं
शद्भेदाः ॥ प्रबंधेप्यर्थशक्तिमूलः । अर्थशक्तिमूलः पदवाक्ययोः प्रबंधेपि [illegible] । प्रबंधश्च संघटितनानावाक्यसमुदायः स च ग्रं
थरूपस्तदवांतरप्रकरणरूपश्चेति । तत्र पदवाक्ययोरुदाहृते । प्रबंधे यथा गृध्रगोमायुसंवादादौ । तथाहि । अलं स्थित्वा श्म
शानेस्मिन् गृध्रगोमायुसंकुले कंकालबहले घोरे सर्वप्राणिभयंकरे न चेह जीवितः कश्चित्कालधर्ममुपागतः प्रियो वाय

श्रीस्थ

प

ह

काप्र०
४३

दिवादेव्यः प्राप्तिनां गतिरीदृशी इति दिवाप्रगल्भप्रवत्तो गृध्रस्य श्मशाने बालकपुरुषविसर्जनेन परं वाक्यमेलकं आदित्यो यं स्थितो मूढाः
स्नेहं कुरुत सांप्रतं बहुविघ्नो मुहूर्तो यं जीवेदपि कदाचन अमुं कनकवर्णाभं बालमप्राप्तयौवनं गृध्रवाक्यात् कथं मूढास्त्यजध्वम
विशंकिताः इति निशि प्रगल्भस्य गोमायोस्तु भावत्तेन परं श्लोकद्वयमिति प्रबंध एव व्यंजकः प्रपते अत्र स्वतः संभविना वस्तुना
गमननिवर्तनरूपवस्तुव्यक्तिः एवमन्येष्वेकादशप्रभेदेषूदाहार्य। पदैकदेशरचनावर्णेष्वपि रसादयः। रसादयोऽलक्ष्यक्र
माः पदैकदेशे रचनायां वर्णेषु अपिशब्दात् प्रबंधे पदवाक्ययोस्तु पदेष्वन्ये इत्यनेनैव प्रतिपादिताः पदं तावत् द्विविधं सुबं
तं तिङंतं च तदेकदेशो नाम धातुस्वरूपप्रकृतिभागः तदेकदेशः सुप्तिङ् स्वरूपविभक्तिभागश्च उपसर्गादिरूपश्च। तत्र
पदवाक्ययोरुदाहृतं प्राक्। पदैकदेशादिषूदाह्रियते तत्र धातुरूपप्रकृत्यात्मकपदैकदेशो रसादिव्यक्तिर्यथा रहकेलि

हसी

हृतनिवसनकरकिसलयरुद्धनयनयुगलस्य रुद्रस्य तृतीयनयनं पार्वतीपरिचुंबितं जयति अत्र जयतीति धातुरूप
प्रकृतेः प्राधान्येन यतः स्वाङ्गप्रयत्न व्यापारस्यापि अन्येन नेत्रयोः कराभ्यां पिधानमस्य तु लीलोत्तरेण कर्मणा जितदेवोत्त
रं धन्यज्जीवितमिति उत्कर्षप्रयोजकमनया व्यज्यते अत एव जयतीत्युक्तं न तु शोभत इत्यादि। एवमन्येष्वपि प्रकृत्यादेः रसादि

रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य रुद्रस्य तृतीयनयनं पार्वतीपरिचुंबितं जयति॥४

राम
४३

अनेनाधान्यंतत्र दृष्टं मंजकतयाः बंगेतमं॑ नाम रूपतदेकदेशो तथा क्लिष्टया प्रियानुसो यमथाकृतः सशापथंपारान्ततः कोतथा
ह्वित्रारोपेवपदानिवासमवनाघाव न्लयासुमनाः तावत्पस्तुतपारिशिष्टपुटलसन्तीवीनि वंधहृतो भाविलैवकृतमरणामकम
होप्रेम्णोविचित्रागतिः अत्रद्वारादिपदं परिहृत्यपदानीत्युक्तं तेन द्वारपर्यंतगमनेप्यसहिष्णुतयाउक्तः अतिशयोव्यज्यते
तिङ्सुपोर्यथा पथिपथि शुकचंचूचारुराभांकुराणां दिशिदिशि पवमानो वीरुधां लासकश्च नरिनरि किरति द्राक् सायका
न्पुष्पधन्वा पुरिपुरि विनिवृत्ता मानिनीमानचर्चा अत्रकिरतीति तिङन्तकिरणस्य साध्यता तिङ्योगे साध्यत्वमेव भात्वयो
पस्थितेः निवृत्तेतिसुप्प्रत्ययेन निष्पन्नसिद्धताः सुप्प्रयोगे तथैव प्रकृत्यर्थप्रतीतेः तत्रापि कृत्प्रत्ययेन तीततामकारणाद् इति किरण
निवृत्त्योः पौर्वापर्यरूपातिशयोक्तिप्रकाशोरसोत्कर्षपर्यवस्यति मतुप्[illegible] साध्यत्वं कृत्प्रत्ययेन भूतत्वमिति व्याख्यानेन दृष्टु
क्तं सुप्सिङ्भ्यां सिद्धत्वसाध्यत्वमभिधायतत्रापि कृत्प्रत्ययेनातीतत्वमित्यनेन हि व्याख्यानेनविरोधात् अत्र सुप्सिङ्विशेषु
यथा लिखन्नास्तेभूमिं बहिरवनतः प्राणदयितोनिराहाराः सख्यः सततरुदितोच्छूननयनाः परित्यक्तं सर्वं हसितपठितं
पंजरशुकैस्तवावस्था चेयं विसृज कठिने मानमधुना अत्र लिखन्नित्युक्तं न तु लिखतीति तेन शत्रा लिखनस्याप्राधान्य

का०प्र०
४४

मबुद्धिपूर्वकत्वरूपं ख्यापयितुमुक्तं नत्वासीदिति । तेन तथाविधस्य स्वप्रसादपर्यंततानिवृत्तिः । नत्वाभ्युच्यते । पिपासाप्रत्ययः सुपः
प्रकृतिरेवत्तथापितिजरेदित्रिनहिकृतितयास्तिरः । त्वं नैवोराहृतः । भूमिमिमुक्तं तनुरूल्लमावितिः । तेनबुद्धिपूर्वकेन मौनं किंचित्तलिख्य
तदीति सुधित्रि भग्नत्वाव्यज्यते । गामारिस्वमि गामेवलामिगाश्वरस्थित्वा इत्याग्रागामिणामपिन्याणेपद्वयोहारेमिजाहोमिसाहो
मि ब्रह्मनागरिकाणामिति विषयापत्तिपदार्थेतादृशकेलामिहतोदिह्वपदउत्कर्षः प्रकाश्यते । रमणीयः क्षत्रियकुमार आसी
दित्यत्र तुल्यजातीनकालविहितेनाविरतदीयहिंसायाः सुकरत्वं व्यंज्यता प्राधान्येनवदुर्दर्शित्वनुमेगजन्मा भार्गवक्रोधः प्र
काश्यते । वचनविशेषो यथा । तारागुणाकुहणासंतानामुक्तं टभंगतस्सपेमत्त स्सेतारणाभणित्रावाणांस्तुंदरहरिसिमं जा
ममवसारांसत्रगुणागमहणारीणोपेमहेतूना भानाप्रकारकत्वेपिकाम्यप्रेमएकमातीयमेव । नकदाविदन्ययाभावं मा
मंदतिवहुवचनेकवचनाभ्यां व्यज्यते । पुरुषव्यत्ययव्यंजकत्वं यथा रेरेचंचललोचनांचितरुचे चेतः प्रमुच्य स्थिरप्रेमाणं
महिमानमेणनयनामालोकय किं नृत्यसि । किं मन्ये विहरिष्यसे बत हतां मुंचांतराशामिमामेषा कंठतटेकृता खलुशिलासं
सारवाराशौ निधौत्रतत्वंमन्येऽहं विहरिष्यसे इतिप्रहासेवमन्योपपदेमन्यतेरुत्तमएकवच्चेति सूत्रेण युष्मदस्मदोर्विपर्ययेउ

राम
४४

ऋमनभ्यस्तयोर्विपर्यये स्याद्विधाने प्रहास■मभिव्यञ्जकं हि पूर्वनिपातात् यः पदैकदेशधर्मत्वात्पदैकदेशा एवमन्यत्रापि ते पूर्वनिपातस्य
यथा· येषां दोर्बलमेव दुर्बलतया ते संमतास्तैरपि प्रायः केवलनीतिरीतिशरणैः कार्यं किमुर्वीश्वरैः ॥ ये क्ष्मायाः पुनः पराक्रम
नयस्वीकारकांतक्रमास्ते स्युर्नैवमवादृशास्त्रिजगति द्वित्राः पवित्राः परं ॥ अत्र बाहुके पराक्रमनयेत्यत्र न यस्यात्यापूर्वत्वे
न पूर्वनिपातनमविधाय पराक्रमस्य तत्तद्भावोऽभ्यर्हितत्वं द्योतयति ॥ उपपदविभक्तिविशेषस्य यथा प्रथमगुणनिवीरश्चेन्नुमेंर्वे
निःसृतिविधुरैरयोधितवद्दिवसं क्षितिसेनकृन्नरपतेर्बाणपुङ्खविधिसिद्धसाधुवादपदैश्च वीररसात्मनि भवान्नाद्दिवसे
नापुङ्खैरिति ॥ अपवर्गे तृतीया· अपवर्गश्च फलप्राप्तौ क्रियापरिसमाप्तिः अतो भवतस्तदार्थस्य पुङ्खरूपक्रियाया यतः फले विजय
सत्वात्तासिसत्ती यथा द्योत्यते· यस्तु पुङ्खवेधीत्यादिक्रियाविशेषणानि निर्व्यापारत्वमातवान् संदेहोऽभगमपि नाहासीदिति ॥
प्रत्ययरूपस्य प्रकृत्येकदेशस्य यथा· भूयो भूयः सविधनगरीरथ्यापर्यटंतं दृष्ट्वा दृष्ट्वा भवनबलभीतुंगवातायनस्था । सा
क्षात्कामं नवमिव रतिर्मालती माधवं यद्गाढोत्कंठा ललितलुलितैरंगकैस्ताम्यतीति ॥ अत्र रोगकैरिति कस्वरूपतद्धितेनास्या
र्थकेनानुकंपाभिव्यज्यते· उपसर्गरूपस्य पदैकदेशस्य यथा परिच्छेदातीतः सकलवचनानामविषयः पुनर्जन च

89

का०प०
४५

न्यस्मिन्ननु भवप्रदेशेन गतवान् विवेकप्रध्वंसादुपचितमहामोहग्रहग्रस्तो विकारः कोऽप्यन्नैडपतिवतायं चकुरुते श्वसप्रध्वंसादिवि
प्रभावः प्रकृत्येकदेशः प्रकर्षद्योतकः उपसर्गो रागमवाचकत्वात् निपातरूपपदैकदेशस्य यथा ॥ कान्तेव गवीभिमुखं मनस्त्वया
किमन्यदेवं निहताश्च नो द्विषः तमांसि तिष्ठन्ति हिताविदंशुमात्रभावदायात्सुदयाद्रिमौलितो ॥ अत्र वदये नमनो गवीभिमुखी
कराणां तु भुवनन्नयोरेककालतारूपः समुच्चयो द्योत्यते । यद्यपि चेति भिन्नमेव पदं न च न्यस्यैकदेशस्तथापि केवलस्य तस्या
साधुत्वात् पदैकदेशत्वोपचारे गोदाहरणं । अत्र स्वो कं भोजराज्ञे नोपमात्मकरसो । नहीवादेः साध्येकत्वे पिपधकृपदत्ता
मनुशास्तीति । एते नतिङन्त समभिव्याहृता उपसर्गा अपि व्याख्याताः ॥ अप्यवकेइहु नो यथा ॥ रामो सोऽनुवने अवि क्रमगुरोः
प्रासः प्रसिद्धिं परामस्मान्नाद्यपविपर्ययाद्यादिपरदेशेन जानातिते वेदीवेषु प्रयाणासि गायति मरुघस्यके वारगाहितिश्री
कृतविद्या लताल विवरोहिरैः स्वैरैः ससर्भिः अत्रासाविसत्र सर्वनामः विपिति न लदेशो विपिति मुवनेवेति भुवनरूपप्रा
तिपदिकस्य बहुवचनस्य च विक्रमगुरोरिति च हन्दोरोन दोषे वेति प्रातिपदिकवचनयो व्यंजकत्वं किं नास्ति द्वाग्येत्य
त्रनत्वद्वाग्येति नवामद्वाग्येति कृतं तेनास्मादि सस्य बहुवचनस्तिह तथा सर्वासेपकत्वं तथा नाग्यविपर्ययादिसन्य

राम
४५

न

पासंपन्निमुखेनो क्तत्वभागपादित्वभावमुखेन। अनन्तपाविधानेन अभागपविरहेपि भागपान्येवृत्ताहत्वालेन परिग्राता
निनिश्चयः स्पते। तरुणिमनि कलयति कलामनुमदनधनुर्भ्रुवो। पठत्यग्रे अधिवसति सकलललनामौलिमिथ्यैं कितहरिगाव
ल। अपूर्वनांशत्र तरुणिमनीतीमनिचः तरुणात्वपदेन। अनुमदनधनुरित्यव्ययीभावस्य धनुः समीपइत्यनेन। मौलिमधिवस
तीतिकर्मत्वाधारस्य मौलौ वसतीत्यनेन नौ अपि वाक्यत्वेऽस्मिन्कश्चित्स्वरूपस्य विशेषोपस्थमत्कारकोस एवं व्यंजकः। तत्र
तद्भावेन प्रकृत्यर्थस्य योदत्वं प्रत्यते दुमनिबालतत्वातिरेको नवतं धनुषः समीपइत्यत्र धनुषोऽसंतं गुणीभावः। अव्ययीभावेन
पूर्वपदार्थप्राधान्येपि उत्तरपदार्थस्य किंचिदेवाप्राधान्यं कर्मत्वाधारत्वं लेत्वमाभिरेवगम्यत इत्यवसेयं। एवमन्येषामपि बो
द्धव्यं। वर्णरचनयोर्व्यंजकत्वं गुणस्वरूपनिरूपणे उदाहरिष्यते। प्रबंधेतु नाटकादौ रसादिव्यंजकत्वं दृष्टव्यं। पद्यपूर्वप्रबंध
शब्देन संघटितावांतरवाक्यसमूहो विहितः इदानीं तु संघटितमहावाक्यमित्येतन्न रूप्यमिति कश्चिदाह। तद्युक्तं नात्र। पूर्वं
हि अर्थशक्तिमूलमात्रस्य प्रबंधविषयत्वं अत्र त्वसंलक्ष्यक्रमव्यंग्यस्येति पौनरुक्त्याभावात्। भिन्नान्तरेकञ्चतात्ते तथा
हि अविवक्षितवाच्यस्य द्वौ भेदौ। तौ च मत्वैकं पदवाक्ययोरिति चत्वारः। विवक्षितान्यपरवाच्ये तु मध्ये असंलक्ष्यक्रमव्यंग्यः पद

व

काप्र०
४६

वाक्यतदेकदेशाघटनावर्णप्रबंधभेदेन षड्विधः लक्ष्यक्रमेषु शब्दशक्तिमूलस्य द्वौ भेदौ तौ च प्रत्येकं पदवाक्ययोरिति तस्य च
त्वारो भेदाः अर्थशक्तिमूलस्य द्वादश भेदास्ते च प्रत्येकं पदवाक्यप्रबंधेष्विति षट्त्रिंशदस्य भेदाः उभयशक्तिमूलस्य वाक्य एवेति
॥ ॥ तेषां चान्योन्ययोजने संकरेण त्रिरूपेण संसृष्ट्या चैकरूपया वेदखाब्धिवियच्चंद्राः १०४०४ संशयेनांगांगिभावेन
एकव्यंजकानुप्रवेशेन चेति त्रिविधः संकरः उक्तप्रकारत्रयं विना संयोगः संसृष्टिः एवमेकपंचाशतो भेदानामेकपंचाशता भे
देर्योजनमिति तावतां तावद्गुणनेन सहस्रद्वयं एकाधिका षट्शती च संयोजने च संसृष्ट्यादिचतुष्प्रकारैरिति तावतां चतु
र्गुणने दश सहस्राणि चतुरधिकानि चत्वारि शतानि च संपद्यंते नन्वनुग्राह्यानुग्राहकभावेन संकरस्थले अनुग्राहक
स्यांगत्वात् गुणीभावश्चेति न ध्वनिसंकरत्वमिति चाच्यं अनुग्राहिस्वतश्चमत्कारित्वस्य तस्य किंचिदुपकारकतामात्रेण तद्गुणी
भावे गुणीभावस्यैवेति न च चैकपंचाशद्भेदेषु कतरस्य पंचाशता ■ तायोजनं स्वस्य तु स्वेन कथं योजनमिति चेत् न व्यक्तिभे
दमादाय विजातीयवस्तुजातीयेनापि संकरादिति स्वेन कतुरावाघः अत्रार्वाचीनाः ग्रंथानेवमयुक्ता अग्रिमाग्रिम
भेदस्य योजनेन एकैकभेदह्रासात् तथाहि अर्थान्तरसंक्रमितवाच्यस्य अत्यंततिरस्कृतवाच्येन योजने एको भेदः स्व

राम
४६

९२

६

वात्पंततिरस्कृतवाच्यस्यार्थांतरसंक्रमितवाच्येन योजनायां॥ एवमन्यत्रापि। तस्मात्। एको राशिर्द्विधा स्थाप्य एकमेकाधि
कं कृत्स्नमाधेनात्स्नतो गुणयेत्। एतत्संकलितं लघु प्रसुक्तादिशाद्विपंचाशदर्थेन विद्विशत्या एकपंचाशतेन गुणयेत्। तथा च रसय
स्त्राब्धिमेदिन्य इति १३२६ त्रयोदशशतानि षड्विंशत्यधिकानि जायंते। योगश्चत्वारः प्रकार इति तेषु चतुर्भिर्गुणितेषु वेदाब्धिदह
नेषव इति ५३०४ पंचसहस्राणि चतुरधिकं शतत्रयं संकीर्णभेदा इत्येवं व्याप इति वदंति॥ अत्र ब्रूमः। अनुभवसिद्धो तावत्प्र
ढुकादीसु रसे शिवश्वनिश्चयितह्य वातिशया नतिशयार्थितथा वार्थांतरसंक्रमितवाच्यस्य प्रतिशाय स्ततो त्यंततिरस्कृ
तवाच्येन तद्योजनं॥ यत्र तात्पर्ये परित्यंतत्वात्यंततिरस्कृतवाच्यस्येतरेण योगो नमितिव्यपदेशः॥ एवमन्यत्रापि द्वे। एतदेवप्र
धान्यमादाय गणनानां सैत्री। न त्वेवं प्रत्येकयोरभयोस्तत्स्वभेदविवारुत्वंतस्य नेदांतरत्वं स्यादिति। नेवं अपकर्षाभावस्यातिक्षय
पदेन विवक्षितत्वात्। तत्रोभयमेदसंकरस्वीकारात्। एतादृशो वा स्थानेप्यदालंबनमात्रमेवमहत्येरूपमिति सहृदयभा
वमास्थायालोचनीयमिति। ध्रुवभेदैः सहैषां रेषुगणवंदवः १०४५५ तेषु दिशा त्रसमुदाद्दिप्तैः ध्वरापात्रमात्रादे
स्वरजात्याः संस्कृत प्राकृत पिंदे भणितिदा। रु प्रहिपलोहरवसहीपरस्तिमरणु सिंजउवराई॥ अत्रानुनपत्तेर्वाच्योऽनु

५

93

काप्र०
४७

पः किमुपभोगलक्षणे लक्ष्ये संक्रमितः आहोस्वित् अविवक्षितस्वरूपभोगस्य व्यंजक इत्यविवक्षितवाच्यविवक्षितान्यपरवा
च्ययोः संदेहः संकरः स्निग्धश्यामलकांतिलिप्तवियतो वेल्लद्बलाका घना वाताः शीकरिणः पयोदसुहृदामानंदकेकाः क
लाः कामं संतु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव । अत्र मुख्यार्थबाधे लिप्तपदं
सेचके लक्षणपदतिरोधानं व्यनक्ति । पयोदे वा चेतने सौहृदाभावात् सुहृत्पदं उपकारित्वं लक्षयदतिशयं प्रतिपादयति
पयोदानां मयूरनिष्ठकेकाद्युपकारशीलत्वात् । रामपदं च सर्वसहत्वाद्युपयुक्तशाक्यार्थं तथा सकलदुःखभाजनत्वं ल
क्षयत्सीतां विनापि जीविष्यामीति व्यंजनपदं च विप्रलंभं व्यनक्ति । तत्र लिप्तेति पयोदसुहृदामिति चानयोरत्यंततिरस्कृ
तवाच्ययोः संसृष्टिः ताभ्यां सह राम इत्यर्थांतरसंक्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेन संकरः तयोरुद्दीपक
त्वात् । रामपदेनैवैकव्यंजकानुप्रवेशो नार्थांतरसंक्रमितवाच्यरसध्वन्योः संकरः रामोऽस्मीत्यनेनैव लक्षणामूलस्य
विप्रलंभस्य च व्यंजनात् विप्रलंभमेवाके व्यंग्येऽस्य प्राधान्यात् । एवमन्यदप्युदाहार्यं ॥ इति श्रीमहामहोपाध्यायश्री
गोविंदठक्कुरकृते काव्यप्रदीपे ध्वनिभेदविभागश्चतुर्थ उल्लासः ॥ ४ श्रीदुर्गायै नमः ॥ एवं ध्वनौ भेदप्रभेदान्योमि

व्य
वी
प
धा

राम
४७

णीति गुणीभूतव्यंग्यस्य भेदानाह॥ अगूढमपरस्यांगं वाच्यसिध्यंगमस्फुटं संदिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुंद
रं व्यंग्यमेवं गुणीभूतव्यंग्यस्याष्टौ भिदा मता॥ वाच्यापेक्षया चमत्कारकारित्वेन व्यंग्यस्य गुणीभावः। तत्र स्वतस्त्वा
सुंदरत्वेनाप्यगूढत्वादिविशेषणसमूहकेन चेत्यर्थः॥ अगूढं वा सहृदयैरपि वेद्यं॥ नादरं काव्यापमानतया न तथा
चमत्करोति॥ यथा कामिनीकुचकलशवद्गूढं रसमन्यैषविभेदे ध्वन्तुं वस्वसाक्षी॥ अपरस्यांगं॥ अपरस्य रसादेः स्व
नैरपेक्ष्येण रसाद्यभिव्यंजकत्वेऽपि कारकं॥ वाच्यसिद्ध्यंगं॥ वाच्यस्य सिद्धिरेव पदवी नान्तरं। अस्फुटं॥ सहृदयानामपि दुः
खसंवेद्यं॥ संदिग्धतुल्यप्राधान्ये इति॥ संदिग्धप्राधान्यं तुल्यप्राधान्यं चेति द्वयमित्यर्थः॥ काक्वाक्षिप्तं॥ यथा काक्वा विना
वाक्यार्थस्य रचनात्तान्न लभते तेषाम काव्यं। काक्वा हठेनोपस्थापितमिति वा॥ असुंदरं॥ स्वभावादेव वाच्यापेक्षया
ऽचारु॥ तेष्वगूढं यथा॥ यस्यासुहृत्कृततिरस्कृतिरेत्य तप्तसूचीव्यधव्यतिकरेण युनक्ति कर्णौ॥ कांचीगुणग्रथन
भाजनमेष सोऽस्मि जीवन्नसंप्रति भवामि किमावहामि॥ अत्र जीवन्नित्यभिमतकार्याशक्तत्वेन संक्रमितवाच्यं॥ तस्य
चमत्कारणमेवं व्यंग्यमितिव्यंग्यं सहृदयैरपि वाच्यवत्प्रतीयत इति गुणीभूतं॥ उन्निद्रकोकनदरेणुपिशंगितांगा

५

येतिमेनुमधुरस्यो [illegible] वि पाम्हरीर्ष्किकासुरतह्मकास्तिचरवेर्नवबंधुजीवपुष्पछ्छदानमुदयाचलचुंबिबिंबं॥ अत्रेंदुवर्तवं [illegible] संयोगो मुख्योर्थः अवेतनेवाधितइति संयोगमात्रं लक्षयतोस्यास्यंतरति रस्कृतवाच्यत्वं व्यंगपश्वास्यैव षः कालोवाच्यीयमानतयागुणीभूतः नवत्रलक्षणावच्छेदकस्य संयोगत्वस्य वस्तु संयोगेपिसत्वात्कथमत्यंततिरस्कृतवाच्यत्वमितिचेत् लक्षणावच्छेदकस्यसत्वेपिवाच्यस्यसंयोगविशेषस्यान्वयाप्रवेशात्॥ अत्रासीत्फणिपाशबंधनविधिः शक्त्या भवद्देवरे गाढं वक्षसिताडिते हनुमता द्रोणाद्रिरत्राहृतः दिव्यैरिंद्रजिदत्रलक्ष्मणशरैर्लोकांतरं प्रापितः केनाप्यत्र मृगाक्षिराक्षसपतेः कृत्ता च कंठाटवी॥ अत्रानुपकोपनायकप्रतिनायकेषु निर्दिष्टेषु वक्तृर्थवा कोऽनुसंधिपिनायको रामस्य वाच्यापि व्यंग्या प्रतीयते। सच केनापीत्युपादानेन वाच्यायमानतया ऽगमूढः कृतः तस्याप्यत्रेतिपाठेन ध्वनितया ध्वनित्वमप्याहतमेव। अत्र श्लोके प्रतिवाक्यमत्रेति उपादानेप्रत्येकमेवाद्भुतत्वं ध्वनक्ति। अपरस्परसादेर्वाच्यस्य वा गमधानस्यांगं अलक्ष्यक्रमः अनुस्वानाभलक्ष्यक्रमो वेति द्विविधः तत्र प्रथमे रसस्यांगभावेन गुणीभूतत्वं यथा। अयं सरसरसनोत्कर्षी पीनस्तनविमर्दनः नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥ अत्र भूरिश्रवसश्छिन्नं हस्तं समालाप्य तद्धं [illegible] लायेस्ते

५ अन्तोमियावद्भुवत्तावाद्धिश्री हिमांशुमृनत्तवभुजोवावस्तनोभुदिताः॥ अत्र भूविषयो रतिभावो राजविषयस्य रति ×

तोर

गारः करुणस्यांगं॥ निष्पन्नस्य रसस्यापरांगत्वाभावादुक्तपदेनात्र छायाविभावोद्भव्यः॥ रसस्यैव भावांगता यथा के-

क लासालयभालवन्नूयानिवीर्णितालकव्यक्तिः पादनरवद्युतिमिषिरिन्दुवः साधः सराग्राप्ततौ स्पर्धाविधसन्दृश्मिवस्ष्टद्वंद्वरहा

यथा नेत्रयोः कांतिः कोकनदानुकारसरसासद्यः समुल्लासीते॥ अत्र वक्तुर्देवीविषयकरतिरूपभावे देवयोः श्रृंगारोगं-

भावे भावस्यांगत्वे यथा॥ अस्तुत्याः परितः स्फुरंति गिरयः स्फारास्ततोंभोधयस्तानेतानपि विभ्रती किमपि नक्लांतासि

तुभ्यं नमः॥ आश्चर्येण मुहुर्मुहुः स्तुतिमिति भावस्यांगं॥ आभासस्यांगत्वे यथा॥ वंदीकृत्य नृपद्विषां मृगदृशस्ताः पश्य

तां प्रेयसां श्लिष्यंति प्रणमंति लांति परितश्चुंबंति ते सैनिकाः॥ अस्माकं सुकृतैर्दृशोर्निपतितोस्यौचित्यवारांनिधे विध्व

स्ता विपदोऽखिलास्तदिति ते प्रत्यर्थिभिः स्तूयसे॥ अत्र प्रथमार्द्धे श्रृंगारोऽननुरक्तविषयतया। द्वितीयार्द्धे तु रतिरू

पोभावः शत्रुविषयतयाभासः॥ तौ च राजविषयकरतिभावस्यांगं॥ भावशान्तेर्यथा॥ अविरलकरवालकंपनै

र्भृकुटीतर्जनगर्जनैर्मुहुः ददृशे तव वैरिणां मदः स गतः क्वापि [illegible] वैरिणो तरगतः॥ अत्र वैरिणो गर्वरूपो भावः तस्य प्रा वे

का०प्र०
४९

मोराजविषयकरतिभावे॥ गौणभावोदयस्य यथा साकं कुरंगकदृशा मधुपानलीलाः कर्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते॥ अन्या
भिधायितवनाम विभो गृहीते केनापि तत्र विषमामकरोदवस्था॥ अत्र विषमावस्था व्यंग्यस्य त्रासस्वरूप भावस्योद
योराजविषयरतिभावस्य भावसंधेर्यथा॥ असोढा तत्कालोल्लसदसहभावस्य तपसः कथानां विस्रंभेष्वथ च रसिकः
शैलदुहितुः प्रमोदं वो दिश्यात्कपटबटुवेषापनयने त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः॥ अत्र स्मरहरगतयोरा
वेगधैर्ययोः संधिर्नृपविषयरतिभावस्य गौणभावशबलतायां यथा पश्येत्कश्चिच्चल चपल रे का त्वरा हं कुमारी हस्ता
लंबं वितर हहहा व्युत्क्रमः क्वासि यासि इत्थं पृथ्वीपरिवृढ भवतो विद्विषोऽरण्यवृत्तेः कन्या कंचित्फलकिसलयान्या
ददानाभिधत्ते॥ अत्र यत्पश्येत्कश्चिदिति शंका चल चपल रे इत्यसूया का त्वरेति धृतिः अहं कुमारीति स्मृतिः हस्ता
लंबं वितरेति श्रमः हहहेति दैन्यं व्युत्क्रम इति विबोधः क्वासि यासीत्यौत्सुक्यं एषां शबलता नृपवि
षयरतिभावे॥ ग्रं॰ एते च गुणीभूता रसादयो रसवदाद्यलंकाराख्यपदं लभंते॥ ननु गुणीभूता रसादयो रसवदा॰ भावस्य

ह

राम
४८

प्रेयः रसभावाभासो ऊर्जस्वित्वाख्योतिः समाहितद्वयस्येव पूर्वेषामलंकारव्यवहारात्पुनर्भावोदयादिषु तत्क
थमेतदुक्तमिति चेत् यद्यन्यवचनेविनामह्युवमिनादरः तर्हि किमित्युक्तमेतावता नवरसेष्वपि तरसादिना तुल्यन्यायत्वादि
ति नन्वेवंसति पुष्टनिगुणीभूतव्यंग्यप्रभेदेषु ध्वनिभेदेरलंकारभेदेवीऽवश्यंसंकरः संसृष्टिर्वा वृत्तेतत्कथं ध्वनिरि
कवितत्कचिद्गुणीभूतव्यंग्य इति तत्रापि क्वचिदलंकारध्वनिरित्यादि एवं तु गुणीभूतव्यंग्य इत्यादि व्यपदेशो नो विषयइ
ति चेत् प्राधान्यात् यत्र हि यस्य प्राधान्यं तत्र तेन व्यपदेशः प्राधान्येवातिशायितश्चमत्कारः सबस्तहृदयैकवेद्य इति
नास्ति हि अथवा सांगभावेन शब्दार्थालंकारस्य अलक्ष्यक्रमस्य गुणीभावो यथा तेन स्यानेन्योऽतंकनेकमगात
स्मौधि यावद्वो वैदेहीति मतिपदं तु रूक्ष्मलपितं कालेकाभर्तुर्वैरं न परिपालपुष्टेन गतयासीराम लेकुपालव सुता
नलवधिगता॥ स [illegible] पादत्रयद्योत्यापि रामेग्रहेपमामयापूर्व मलविभिन्न तेनवाच्यमत्रीनीता तदंगवचार्चव्य
क्तिमत्तानुरागानुरूपोद्दितीयोर्थः॥ वाच्यस्य व्यंग्यस्याक्तिमत्तलसांगभावो यथा आगत्य संप्रति वियोगविसंष्ठुलांगीमे

धित

दि

काप्र०
५०

मोक्तिंनीं कश्चिदपि क्षपितत्रियामः॥ इतीं प्रसादयति पश्यपश्योनेः प्रभाते कलत्रं निपादपतनेन सहस्ररश्मिः॥ अत्राध्येशक्ति
मूलो नायकनायिकाव्यवहारो वा अरविकमलिनीवृत्तांताध्यारोपेणात दंगतयेवक्षितः॥ समासोक्तो द्वयो हृदयेशयविलो
लेत्यादो सर्वत्र प्रतीयमाना नायिपस्थत्वाव्यस्येवप्राधान्यात॥ अप्येवमादपतनेनेति श्लिष्टशब्दसद्भावेपि शब्दशक्ति
लत्वेन व्यपदेश्यः किंत्वर्थशक्तिमूलत्वेन प्राधान्येन व्यपदेश्य इति न्यायमत॥ तदतिरेकेणापि नायकनायिकावृत्तांतस्य
क्रिसंभवाच्च॥ नचोपमा अत्रं स्यात् उपास्यकान्तेलादिवत्श्लेषाभावात॥ नचवाच्यसिद्धांगत्वे रवि कमलिनीवृत्तांतस्येत
न्नैरपेक्ष्येणैववसितिहेतोरिति॥ वाच्यसिध्यंगं द्विधा॥ एकवक्तृकपदवाक्यगमन्यवक्तृकपदवाक्यगंच॥ अभिसरतिमलसहृदय
तोमलयं मूर्छो तमः शरीरसादैव मरणं वजलदसुद्धगर्जप्रसह्यकुरुते विरहे वियोगिनीनी॥ अत्र हालाहलरूपो विषम
व्याधी अंगपः जलेऽस्मिधालियमनात स व[illegible]जर्दभुजगे निरूपरास्य वाच्यस्युसिद्धिं करोति॥ अत्र न्यायोपमासंदेह
संभवात॥ यथायातम॥ तारस्मृतिरसप्रसादकमकल्लोदांबुधाराभिताजीयासुः कविर[illegible]रवान अवकसावश्योतंगमः अ

पा

राम
५०
स्ता

श्रीन्विगतहिताः पुरातन [illegible] तरानलघोनवान्सुकुवर्तीयाम्निः कल्पमहोबधीनिरमंदकाराशते भारती॥ अन्तरसप्रसादद्व
त्वन्नलप्रसादरूपो ग्रंथः सर्वगाप्याः कर्तश्रीरो बुधाराघा॥ श्रेंगैः॥ अन्यकर्तकथ देवान्सस्यासिहोंगपचा॥ गच्छाम्यत्रु
तदर्शनेनभवन्तः किं प्रीतिमन्यपते किं त्वर्वविजनस्य॥ योर्हंतजनः संभावयत्वन्यथा इत्यामेनरगनेगिरस्वविनरयान्वसक्षा
नरवेदालसाम्नगच्छिष्यतुलकोत्करांचितवपुर्गोर्वीहरिः पातु वः॥ अन्यास्तुनेत्यनेनसोऽहं तुष्टेनत्वं महच्छिवये नभव सदतिव
धिमेवाकच्छानमितिश्र स्तुतो धैर्यादस्वलितत्वं स्मृतो व्यर्थमेव स्थानमिति॥ दर्शनेनेत्यादिना सभोगेनेवतामिरिति॥
किं त्वेवमित्यादिना इयोरकीर्तिर्जीतेव॥ तहृष्येवान्वानं वेचयावदिति रवेदस्त्वम नंते॥ त्वद्वृत्यामेचरगनेगिरस्वविनरया
वसक्षानरवेदालसाम्निस्येनहान्यस्यसिद्धिकृते॥ तद्धिकिंविनास्तद्विशेषस्यापदार्थस्य शरीरालाभात्॥ अन्यस्तु ट्वंपचा
अनहृष्टे दर्शनो केनादृष्टेविश्लेषणीकृता नाहृष्टेवनहृष्टेन भवतालभ्यते स्तवं॥ अन्यनाहृष्टोयथानन्तवसिद्धियोगदुः
खंवचयथानो त्यक्तेतेषांकुर्यादिति॥ संगपंसहृदयस्याविनस्फुरन्नवभासतेः॥ संदिग्धमाधान्यपया॥ हस्तस्तात्किंस्वि

काप्र०
५१

त्परिवृत्तधैर्यश्चंद्रोदयारंभ इवांबुराशिः उमामुखे बिंबफलाधरोष्ठे व्यापारयामास विलोचनानि॥ अत्र तु विलंबेच्छ इति व्यं-
ग्यं॥ युगपल्लोचनत्रयव्यापारस्तं वाच्यं· तयोश्च प्राधान्ये साधकबाधकमानाभावेन संदेहः॥ बाल्यस्याप्य लौकिकत्वेन
चमत्कारकारित्वादुक्तं तथा शयशंजकत्वाभ्यां तुल्यप्राधान्यं यथा ब्राह्मणातिक्रमत्यागो भवतामेव भूतये जामदग्न्य-
स्तथा मित्रमन्यथा दुर्मनायते· अत्र जामदग्न्यः सर्वेषां क्षत्रियाणामिव रक्षसामपि क्षयं करिष्यतीति व्यंग्यं प्रतिवाच्यमपि मान्यमेव
दुर्मनायत इतिवाच्यार्थेन चमत्कारित्वात· विग्रहवत्संधेरपि विवक्षितत्वात्॥ क्लिष्टं यथा मथ्नामि कोरवशतं समरे
न कोपाद्दुःशासनस्य रुधिरं न पिबाम्युरस्तः संचूर्णयामि गदया न सुयोधनोरू संधिं करोतु भवतां नृपतिः पणे-
न अत्र मथ्नामीत्यादि व्यंग्यं प्रतिवाच्यस्य निषेधस्य सहभावेनैव व्यवस्थितं· तादृशाकांक्षाविना वाच्यस्य बाधितत्वेनाग्र-
हणीयत· हठेनैव नदाक्षेपादेस्तु के॰ मा॰ असुंदरं यथा वानीरकुडुंगो॰ ड्डीनशकुनिकोलाहलं सखि शृण्वत्याः गृहकर्म-
व्यापृतायाः वध्वाः सीदन्त्यंगानि· अत्र दत्तसंकेतः कश्चिल्लतागहनं प्रविष्ट इति व्यंग्यं· तस्मात् वाच्यं चमत्कारकारि-

का
ई
राम
५१

शब्दश्रवणसमकालमेव सर्वांगावसादसंलक्ष्यमानतारूपस्तस्यातिशैघ्र्यात्॥ उत्कंठातिशयप्रयोगवसन्तलतां॥
योनेदाघघायोगं वेदितव्यास्त्र पूर्ववत्॥ ध्वनेरिव॥ चकारो भिन्नक्रमः। पूर्वेवेत्यर्थः। यथायोगं। यथासंभवं। तेनायमर्थः। न के
वलमेतत्स्वगुणीभूतव्यंग्यस्य भेदाः। किंतु ध्वनेरंतरसंक्रमितवाच्यत्वादिभिर्यथायोग्यं भेदैः। तथाऽसंभविनो द्विधा यासया
पितेरूपाधिभिः॥ बहुभेदाः संकरसंसृष्टिभ्यां योजनेदत्ते(?)षामेषां च संकीर्णभेदा अपि बोद्धव्याः॥ अलंकारविशेष(?)॥ वस्तु
मात्रेणालंकारव्यक्तिनिबंधनाः तदुक्तं ध्वनिकृता। अस्यैते वस्तुमात्रेण यदाऽलंकृतयस्तदा ध्रुवं ध्वन्यंगता तासां का णो
व्यवृत्तेस्तदाश्रयादिति॥ अत्र ध्वन्यंगता व्यंग्यतया ध्रुवं ध्वन्यंगता ध्वनिनैव तावत्स्यात्॥ तदं(?)जनकस्य ध्वनित्वमेवेत्यर्थः॥
कुतः काव्यवृत्तेस्तदाश्रयात्। काव्यप्रवृत्तेस्तदभिसंधानपूर्वकत्वात्। वस्तुमात्रापेक्षयाऽलंकारस्य चारुतातिश
यमादित्यर्थः। ननु यद्यलंकारापेक्षया वस्तुमात्रस्य नातिशौर्यं यदा व्यंग्यताय(?)न्तोऽयत्नतु(?) भवास्ति हि। अतो वाच्यताऽप
पकर्षहेतुः व्यंग्यता तूत्कर्षायेति सिद्धं। यत्र चालंकारेण वस्तुमात्रे व्यंग्ये ऽत(?)ऋालंकारस्य वाच्यत्वेन किंचिदपकर्षाः
×अयनियमस्तदा कथमलंकारेणावस्तुमात्रव्यंजने ध्वनित्वमिति चेत्॥ उच्यते स एवार्थो वाच्यसंपन्नतया चमत्करोति ×

103

९।२

वस्तुमात्रस्य व्यंग्यत्वे न किंचिदुत्कर्षात् तद्युज्यत एव ध्वनित्वं । यत्र च वस्तुमात्रेऽलंकारो व्यज्यते तत्र वस्त्वलंकारयोर्वाच्यत्वं
ग्यत्वाभ्यामतिशये नैवोत्कर्षापकर्षाविति कृतो गुणीभूतव्यंग्यत्वावकाशः । इदं तु विवेच्यं एवं चात्तत्वानावगिवेधने गुणीभू
तत्वं नाभूत् । अग्रगृहत्वादिनिबंधने तु तस्मिन् कोऽपि विशेषो नेति । यत्तु नरघ्नानामेव भेदानां संकीर्णत्वमत्रातिदेशः कृतिर्दं सूत्रं

व्याख्यातं

प्रिति । तद्बोधात् । न भासतीति हि यथा योगमित्यनेनैव स्वव्यंग्यालंकारैः [illegible] रूपभेदयर्युहासवे यथ्यं संकरादि
नीतयाप्यभ्याहतेः । एवंसजातीययोगो ध्वनेरुक्तः इदानीं विजातीययोगमाह सालंकारैर्ध्वनेस्तैश्च योगः संसृष्टिसंकरैः ॥
सालंकारैरिति । भिन्नार्थैकरूप नानार्थादेकशेषः एकत्रालंकारघटस्य भावप्रधानत्वात् । तथा चैतैरेवालंकारैरलंका
रसहितैश्चैतैरित्यर्थः । तेनध्वनिनाम्गुणीभूतव्यंग्येन वाच्यालंकारेणा च ध्वनेर्योग इति पर्यवसितः स्यादुक्तमेवमितद्दुक्तं
ध्वनिकृता । सगुणीभूतव्यंग्यैः सालंकारैः सहप्रभेदैः स्वैः संकरसंसृष्टिभ्यां पुनरप्युद्योतते बहुधेति । सध्वनिः सालंकारै
गुणीभूतव्यंग्यैः स्वैः प्रभेदैश्च सहसंकरसंसृष्टिभ्यां बहुधोद्योततइत्यर्थः । अन्योन्ययोगादेवं स्याद्भेदसंख्याऽति

राम
५२

न्यग्रसौ सर्वे ध्वन्यादिभेदैः स्तत्वभेदैश्च योजनेऽतिप्रभूतानां संख्या भवतीत्यर्थः एतैः प्रभेदैरुपनिबध्यमानः पुरातनोऽप्यर्थो
नवनवीभवतीति सप्रयोजनं ध्वनिभेदोपदर्शनं बहुकं ध्वनिकृता । ध्वनेर्यः सगुणीभूतव्यंग्यस्यात्मा निदर्शितः एतेनानंत्य
मायाति कवीनां प्रतिभागुणा इति ॥ तदेवमनेनानोध्वननव्यापारयोगिनां ध्वनीनां गुणीभूतव्यंग्यानां च काव्यभेदानाम
नुगतोपाधिना संकलनेन त्रयो भेदाः व्यंग्यस्याभिरूपत्वात् तैः तेन तथाहि किंचिद्व्यंग्यं वाच्यत्वसहं । किंचिन्नेत दसहं । वाच्यत्व
सहत्वं त्वभिधया प्रतिपाद्यमानस्यापि चमत्कारकारित्वं तयोराद्यं वस्तुमात्रं अलंकारश्च । अलंकारस्य प्राधान्येपि च वा
ऽलंकारत्वं तथोक्तं प्राक् । रसादिलक्षणस्त्वर्थो न कदाचिदपि वाच्यत्वं सहते । सहि सामान्यतो रसभावादिपदैर्वा । विशे
षतः शृंगारनिर्वेदादिपदैर्वाऽभिधीयमानश्चमत्कारकारी स्यात् । न त्वेवं अभिधानेपि विभावाद्यप्रतीतौ चमत्कारा भा
वात् । विभावादिप्रतीतौ त्वनभिधानेपि व्यक्तस्य चमत्कारकारित्वादित्यन्वयव्यतिरेकाभ्यां विभावादिमुखेनैव प्रतीय
मानस्तच्चेति निर्णीयते । तेनासौ व्यंग्य एव चमत्कारी । न तु विभावादिवाचकपदैर्लक्ष्य एवास्तु रसादिः नहि विभावादि

का॰प्र॰
५३

मुखेऽप्येव प्रतीयमानस्तथेति निर्णीयते तेनासौ व्यंग्यस्य चमत्कारी [illegible] अनुविभावाद्विवाचकपदैर्लक्ष्य एवास्तु रसा[illegible]दि
तिरि नहि विभावादिवाचिपदं विनापि तत्प्रतीतिर्वेत न तु स्यार्थबाधादिविरहात् · ननु व्यंजनायाः शब्दविधायाः स्वीकारायमानत्वात् तत्कु
तो व्यंग्यत्वैरूप्यं कृतो भेद इति चेत् · उच्यते · लक्षणामूलेव सकलमात्रं व्यंग्यं विना लक्षणैव न सम्भवतीति प्राक्प्रतिपादितं · अ
भिधामूलेऽपि शब्दशक्तिमूले द्वितीयोऽर्थस्तेन समनुपमावाव्यंग्योऽपि वेति निर्विवादं · अभिधाया नियमनात् · अ[illegible] र्थशक्तिमू
लेऽप्येवमंगीकर्तव्यं · यतः पदेभ्यः प्रथमं पदार्थस्मृतिः अथ पदार्थविशेषाणामन्वयविशेषरूपस्य वाक्यार्थस्य प्रत्य
यः न तो व्यंग्यप्रतीतिरिति तृतीयकक्षायां कुतोऽभिधायाः प्रसरणं · द्वितीयकक्षायामेव तद्दर्शने लक्षणातः · यतोऽभिहि
तान्वयवादे अवाक्यत्वान्वयस्याकांक्षादिवशेन प्रतीयते · शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इति च सर्वसिद्धं ·।
येऽप्यन्विताभिधानवादिनः देवदत्त गामानयेत्यादिप्रयोजकवृद्धवाक्यं श्रुत्वा तदनंतरं प्रयोज्यवृद्धेन सास्नादिमत्तम
र्थं देशान्तरं नीयमानमालोक्य अयमेतद्विषयकैतत्क्रियागोचरकार्यताज्ञानवानस्य तद्विषयकत्वेच्छावत्वात् · तद्वि

राम
५३

106

अखंडवाक्येन

चयकमहृङ्क्रिमत्वाद्धामइ दितिप्रयोज्यहृहस्य ज्ञानमनुमिमीते· ततः कारणं विना कार्यानुपपत्त्या ऽखंडवाक्यस्यान्वय
व्यतिरेकिराम्लेङ्ज्ञानेन कार्यलिकारणस्वरूपा शक्तिमवधारयति· अथ तेयं संबंधं विना वाक्यस्य सा शक्तिरनुपपन्ने
ति अर्थापत्त्या ऽखंडवाक्यस्य वाच्यवाचकभावरूपं संबंधमवधारयति· यदुक्तं· शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति
तिश्रोतृश्च प्रतिपन्नत्वमनुमानेन चेष्टया· अन्यथाऽनुपपत्त्या तु बोधेच्छक्तिं द्वयात्मिकां· अर्थापत्त्यावबुध्येत संबंधं त्रिप्र
माणकमिति· त्रिप्रमाणकमिति ज्ञातमपेक्ष्यात्रित्वं· न तु प्रत्यपेक्षया· एवमखंडयोः संबंधमवधार्य विशेषतो व्युत्पद्यते
इच्छेत्यनंतरं तेन प्रयोजकेन चैत्र गामानय देवदत्त गां नयेत्यादिवाक्येषु कस्यचिदन्यस्य पदस्यावापे कस्यचिदुद्धारे
सति यस्य भागस्यान्वयव्यतिरेकौ यांपश्यवाक्यार्थभागस्यान्वयव्यतिरेकावुपलभते तत्र तस्य शक्तिमवधारयति
व्युत्पत्त्यवधारणामन्वितस्वपदार्थे॥ [illegible] प्रथममन्वय एव वाक्यस्य शक्तिग्रहात्· पदार्थमा
त्रमात्रानुपपत्त्यबाधात्· व्यवहारेणान्वितस्यैवोपस्थापनाद् [illegible] विना [illegible] व्युत्पत्तिः व्यवहारे

[illegible] गोवाद्यनुरक्तैः॥ व्यवहारस्य च प्रवृत्तिनिवृत्तिरूपस्य पदमा
त्रेण कर्तुमशक्यत्वात् अन्वितो वाक्यस्थितानामेव पदानामन्वितेष्वेव पदार्थेषु संकेतग्रहादन्विताः स्वपदशक्याः तत एव वाक्या
र्थ इति न वाक्यार्थबोधे शक्तेर्विरामः न त्वभिहितानां पदार्थानामन्वयोऽशक्य एव प्रतीयते योग्यतादिवशादिति युक्तं॥ ननु
तथापि संसर्गविशेषोऽशक्य एव पदार्थसामान्यान्वित एव शक्तिग्रहात् अन्यथा गामानयेति पदं कृत्वा अश्वमा
नयेत्यादिवाक्ये तद्वेदमानय यदिमित्यादि प्रत्यभिज्ञानस्यात् पूर्वं गवान्वितानयनपरस्याश्वान्वितानयने अश
नं क्यत्वेनार्थभेदेन भेदादिति चेत् न पदार्थत्वेन सामान्येन विशेषाणामेवान्वयेष्वशक्तिग्रहात् अन्वितानां च विशेषरूप
त्वादित्याहुः तेषामपि मते सामान्येनैव रूपेण विशेषः शक्यो न तु विशेषरूपेण तथा च पदार्थान्तरसामान्यान्विते पदा
नां शक्तिः गवादिविशेषान्वितस्तु विशेषोऽवाच्य एवेति तस्मादभिहितान्वयवादे नवीन एव अन्विताभिधानमये
नु पदार्थसामान्यान्वितः स्वार्थः संकेतविषयः गवादिविशेषान्वितानयनादिरूपस्तु संकेतित एवेत्यवाच्य एव वा राम

क्यार्थः। यदपि केचिदुच्यते शब्दश्रवणानंतरं यावानर्थः प्रतीयते तत्र सर्वत्रापि शब्द एव निमित्तं। यतो नैमित्तिकानुरोधेन नि-
मित्तानि कल्प्यंत इति। तदप्ययुक्तं। शब्दस्य ह्यर्थे निमित्तत्वं कारकत्वं ज्ञापकत्वं वा। न [illegible]मं। शब्दस्यार्थानुत्पादकत्वात्। न
चरमं पुनरनुमन्यते। परंतु संकेतवत्त्वेन ज्ञातस्य। अज्ञातस्य स्वरूपमात्रेण ज्ञातस्य वा ज्ञापकत्वेऽतिप्रसंगात्। न चायं
विशेषे संकेतग्रहः। अस्तु विशेष एव संकेतग्रह इति चेत्। लोके घटमानयेत्यादौ विशेषस्योपस्थापकांतराभावेन शा-
ब्दादेवोपस्थितिर्वाच्या। तथा चात्र संकेतग्रहे शब्दात्तदुपस्थितिः शब्दात्तदुपस्थितौ संकेतग्रह इत्यन्योन्याश्रयात्। त-
तस्मान्नैमित्तिकानुरोधेन निमित्तानि कल्प्यंत इत्यविचारिताभिधानं। अयमेव सोयमिषोरिव दीर्घदीर्घतरो व्यापार इति पक्ष-
ः शाब्दः स शब्दार्थ इति चेन्निः शीघ्रत्वाद्विधिरेव वाच्य इति मन्तोपजीविनः। अस्यार्थः यथा बलवता प्रेरित इषुरेके-
नैव वेगाख्येन व्यापारेण वर्मच्छेदमुरोभेदं प्राणहरणं चारियो विधत्ते तथा एक एव शब्दः एकेनैवाभिधाख्यव्यापारेण प-
दार्थस्मृतिं वाक्यार्थानुभवं व्यंग्यप्रतीतिं च विधत्ते। अतो व्यंग्यमप्यभिमतस्यार्थस्य वाच्यत्वमेव। किं च यत्र शाब्दस्य ता

काप्र०
५५

त्वर्थे सद्भावाद्यर्थ इति निःशेषेत्यादौ तात्पर्यविषयतया विधिर्वीरस्यैवेति । तेन तात्पर्यार्थवाचो युक्ते स्यात्तात्पर्यमज्ञानेतः परमाकांक्षा तद्वाक्य
वर्त्तिपदोपस्थापितस्य विहितार्थस्यैवमनुमन्यते । न प्रतीतमात्रे । तथाहि । भूतभव्यसमुच्चारे भूतं भव्यायोपदिश्यत इति सिद्धांतः भू
स्यार्थः भूतं सिद्धं । भव्यं साध्यं । तयोः समभिव्याहारे भूतं सिद्धं भव्याय साध्यायोपदिश्यत इति कारकपदार्थाः क्रियापद
र्थेन अन्वीयमानाः सिद्धा अपि प्रधानक्रियानुकूलतया साध्यीभूतया स्वक्रियया योगात्साध्यायमानतामाप्नुवंति ।
स्वरूपेण सिद्धा अपि साध्यक्रियाविशिष्टतया साध्या इव भवंति । ततश्च यथा दध्नेन अदधमात्रं दृश्यते । न तद्द्रव्यमपि
तत्प्राख्यानदेवाप्राप्तत्वाद्देवशब्देन विधीयते । यथा ऋत्विक्प्रवरणो ऽन्यतः प्राप्तौ लोहितोष्णीषा ऋत्विजः प्रचरंतीत्यने
न लोहितोष्णीषत्वमात्रं विधीयते । न तु ऋत्विक्प्रवरणं वा । उष्णीषस्यापि प्राप्तत्वाल्लोहितत्वमात्रं । हवनस्यान्यतः सि
द्धौ च दध्ना जुहोतीत्यनेन दध्नः करणत्वं । न तु दधि । हवनं वा । ... रूपं द्रव्यं देवतादेरर्थे त्वपरत्वप्रत्यानां मध्ये एकस्य द्वयो
स्त्रयाणां वा सिद्धौ एकविधिर्द्विविधिस्त्रिविधिर्वा ततश्च यावदेवाविधेयं तावदेव तात्पर्यं । विधेयं च वक्ष्योपात्तमेवेति

राम
५५

सुहृत्कृशशब्दोपात्तस्य घतौत्सर्यमिति । यदि विश्रमतीतमात्रेणौत्सर्यं तदा पूर्वोधावतीत्वाद्येपूर्वादिसमानसंविन्तिवेघतयाप्रतीते
ः पराधत्वेपि कदाचिन्नौत्सर्यं स्यात् । ननु तद्वाक्यवर्तिपदोपस्थापित एव तात्पर्यमिति तेन व्याप्तिः । विषं भुङ्क्ष्व मा चास्य गृहे भुङ्क्ष्वा
इत्यत्र विषं भुङ्क्ष्वेति वाक्यस्य मा चैत्यादिवाक्यार्थे विनात्पर्याद् इति । मैवं । यतस्तदेकमेव वाक्यं । चकारस्यैकवाक्यतासूच
कत्वात् । अन्यथा तद्वैयर्थ्यप्रसंगात् । न चाख्यातवाच्यक्रिययोः साक्षादन्वयः संभवति । गुणानां च परार्थत्वादसंबंधः
समत्वात् स्यादिति न्यायात् । सुहृद्वाक्यं चेदं । अतो भवितव्यमत्रान्वयेन । ततो विषभक्षणादप्यतः [illegible] हनोऽज नमनिष्ठ साध
नत्वतः सर्वथा नास्य गृहे भुंक्ष्वा इति वाक्यार्थे तथा च तद्वाक्यस्थपदोपस्थापित एव तात्पर्यमिति सिद्धं । तस्माद्यत्परः शब्द
इत्यादिपद्युक्तं तात्पर्याज्ञानात् । यदपि सोऽयमिषोरिव दीर्घदीर्घतरो व्यापार इति तदप्युक्तं । यतः श्रवणानंतरं पावान्तर्यः प्रतीयते ताव
ति सर्वत्र यदि स्यात् तर्हि ब्राह्मण पुत्रस्ते जातः कुमारी ते गर्भिणी इत्यादिवाक्यानन्तरं हर्षविषादयोः प्रतीतेस्त
योरपि तद्वाक्यस्याभिधा स्यात् । अथ तद्ध्वनिप्रतिपाद्यं सर्वं तत्राभिधा । हर्षोदयस्तु न तस्य साध्य इत्युच्यते तर्हि लक्षणापि

काप्र०
५६

निर्णेयस्यादितिलक्षणोच्छेदः किंनिमित्तं व श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षा
दिति सूत्रेण भगवान् जैमिनिः श्रुत्यादिषु पूर्वपूर्वबलीयस्त्वं प्रतिपादयांबभूव । सर्वत्रैवाभिधाप्रसंगे उत्तरस्य दौर्बल्ये बीजा
भावात् । सूत्रे तु प्रकृतार्थविच्छेदकत्वेपि बहुप्रकारकत्वाद् दुरूहत्वाच्च व्याक्रियते । श्रुतिलिंगादयः षड् हि विनियोजकाः ।
तत्र विरुद्धयोरेकत्रोपनिपाते समुच्चयो न संभवतीत्येकेनापरस्य बाधो वक्तव्यः । स च बलवता दुर्बलस्येति सिद्धं । तेषां दौर्ब
ल्यप्रतिपादकं सूत्रं श्रुतिलिंगेत्यादि । अस्यार्थः श्रुत्यादीनां समवाये एकत्रोपनिपाते तेषां मध्ये परस्य परस्य पूर्व
पूर्वापेक्षया दुर्बलत्वं । कुतः । अर्थविप्रकर्षात् । पूर्वापेक्षया विलंबेनार्थप्रत्यायकत्वात् । यथा चैतत् तथोदाहरणेन स्फु
टीकरिष्यते । तत्र निरपेक्षो रवः श्रुतिः । यथा व्रीहीन् अवहंतीति । अत्र क्रियाफलभागित्वं कर्मत्वं बोधयंती द्वि
तीया निरपेक्षैव व्रीहीणामवघातशेषित्वं प्रतिपादयति । अर्थविशेषप्रकाशनसामर्थ्यं लिंगं । यथा बर्हि
र्देवसदनं दामीति । अत्र लवनार्थप्रकाशकतया बर्हिर्लवने विनियोगः । परस्पराकांक्षावशात्[illegible]विदेक[illegible]

राम
५६

न्तर्थपर्यवसितानि पदानि वाक्यं यथा। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् अग्नये जुष्टं निर्वपामीत्यत्र लिंगे-
न निर्वापे विनियुज्यमानस्य समवेतार्थभागस्य एकवाक्यताबलेन देवस्य त्वेत्यादिभागस्यापि तत्र विनियोगः। एकवाक्यभावापन्ना-
पदानां कांक्षीतरापेक्षावशा द्वाक्यांतरेण संबंधस्याकांक्षापर्यवसन्नं प्रकरणं। यथा समिधो यजतीत्यादौ। अस्य हि दर्शपौ-
र्णमासकथंभावाकांक्षापाठवशात्। एतत्स्थानं क्रमः स च अनेकस्याम्नातस्य संनिधिविशेषात्मा नं। यथा दब्धिरसीत्यत्र
आग्नेयाग्नीषोमीयोपांशुयागाः क्रमेणाम्नातास्तेषु पठिता मंत्रभागेपि क्रमेणानुमंत्रणत्रयं पठितं। तत्राग्नेयदेवस्य योर्लिं-
गेनैव द्वयोर्विनियोगसिद्धिः। दब्धिरसीत्यत्र तु न लिंगादिविनियोजकं किंचित् अपस्मिन्नपदेशे मूलस्योपांशुयागविधानेन
स्मिन्नेव प्रदेशे मंत्रेप्यस्य पाठ इति क्रमादुपांशुयागानुमंत्रणेऽस्य विनियोगः। समाख्यायोगबलं यथा होत्रं प्रोहात्रमि-
त्यादितत्र हि होतुरिदं होत्रमित्यादियोगबलेन होत्रादिसामाख्यातानि कर्माणि होत्रादिभिरनुष्ठेयानि। अत्र एषां विरोधे
सहरणानि। तत्र श्रुतिलिंगयोर्विरोधे लिंगस्य दुर्बलत्वं यथा। कदाचन स्तरीरासि नेंद्र सश्चसीत्यादिकाया ऋचो विनि-

काप्र०
५७

योजिका श्रुतिः ऐंद्र्या गार्हपत्यमुपतिष्ठत इति · अत्र चैंद्र्याः प्रकाशनसामर्थ्यरूपात् लिंगादिंद्रोपस्थापने विनियोगः प्रतिभाति ·
श्रन्यप्रकाशकस्यान्यत्र विनियोगायोगात् · अस्या गार्हपत्योपस्थापने संप्रतीयते · गार्हपत्यमिति द्वितीया हि कर्मविभक्तित
या कामपि क्रियामपेक्ष्य प्रकृत्यर्थस्य शेषित्वं बोधयति · क्रियाजन्यफलभागित्वस्यैव शेषत्वात् · एवं ऐंद्र्येति तृतीया प्रकृ
त्यर्थस्य शेषत्वं · क्रियां प्रति साधकतमत्वरूपकरणत्वस्य तदर्थत्वात् · तदत्र श्रुतिलिंगयोर्विरोधः · न च बाध्यमिति रथे लघ
द्वितीयया शेषित्वमात्रं प्रतीयते न त्वैंद्र्या मंत्रं प्रति · तत्त्वानिपीमं चेपत्यपि संभवतीति कुतो विरोधः · ऐंद्र्येति पदमपेक्ष्य विधेयो
प्रबोधनाद्विरोध इति चेत् · न तर्हि श्रुतेर्विरोधः किं तु वाक्यस्य · तत्र लिंगापेक्षया दुर्बलमेवेति · यतः शेषशेषिभावः सामान्य
तः श्रुत्यैव बोध्यते · पदांतरप्रक्षेपात्तु विशेषेण व्यवस्थाप्यते · विशेषणासंबंधमात्रस्य पदांतरसंबंधात् प्रतीतेः · तस्मा
तः श्रुत्या सामान्यतः प्रतिपाद्यो योऽसौ वाक्यलभ्यं विशेषमपेक्ष्य लिंगप्रतिपाद्येन विरुध्यते · तत्रायं पूर्वपक्षः · सामर्थ्यमा
नमपेक्ष्य श्रुतिर्विनियोजिका न च समर्थं श्रुतिसहस्रेणापि विनियोक्तुं शक्यते · यथा वह्निः प्रसेके जलं वा दाहे ·

काप्र
५७

अतोलिंगस्यबलवत्वातइंद्रस्योपस्थापनेऽस्याविनियोगः। तदनुरोधित्वाद्वितीयाश्रुतिरन्यथानेतव्या। ऐंद्र्यागार्ह-
पत्यसमीपेऽनयाइंद्रउपस्थातव्यइत्यर्थःपर्यवस्यति। सिद्धांतस्तु। श्रुतिःस्वरूपसत्तामपेक्षते। नतुतद्बोधर्मापि
येनलिंगंबलवत्भवेत्। तस्यचपूर्वंसत्त्वएवज्ञानंविनियोगान्यथानुपपत्त्यापश्चादुपजायते। लिंगंतुविनियोजनेश्रुति-
मपेक्षते। नह्यनेनेंद्रउपस्थातव्यइतिलिंगात्स्वरसतःप्रतीयते। किंत्वीदृगिंद्रइत्येतावन्मात्रं। तथाचप्रकरणाम्नानसा-
मर्थ्यादिंद्रप्रकाशनसमर्थापात्त्वः अन्यथानुपपत्त्याविनियोगःकल्पनीयः। तथाचार्थविप्रकर्षः। तथाहि। श्रुत्यार्थ-
प्रतिसाधकन्यायेनशाब्दोपस्थापितेनैवशाब्दीआकांक्षापर्यवस्यतीतिलिंगेनानयाइंद्रउपस्थातव्यइतिश्रुतिःकल्पनी-
यातत्तस्याविनियोगोभवेत्। ततोयावत्लिंगेनश्रुतिकल्पनापिप्रक्रांतव्यापारंतावत्प्रत्यक्षयाश्रुत्यागार्हपत्येविनि-
योगःसिद्धएवेतिप्रकरणेनिराकांक्षेकयाऽनुपपत्त्याश्रुतिःकल्पनीया। तस्मात्श्रुतेर्बलवत्त्वात्तदनुरोधेनतस्याःसा-
मर्थ्येनीयमानेंद्रपदेपरमैश्वर्यवाचकतयागार्हपत्यस्तुतिपरत्वमित्यवधार्यते। लिंगवाक्ययोर्यथापुरोडाशस्यस्यो-

का॰प्र॰
५८

नकरणस्थापनस्वरूपयोः सदनसाधनयोः प्रकरणेः स्योनंते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि । तस्मिन्न
सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति मंत्रः पठितः । तत्र कल्पयामीत्यंतः पूर्वभागः सदने । शेषभागस्तु सा
दने प्रयोक्तव्य इति लिंगात् प्रतिभाति । अयमत्र एकं वाक्यं । यत्पदाक्षेपेणोपकल्पयामि तस्मिन्सीदेत्येकार्थ्यविच्छिन्नत्वा
द्विभागे साकांक्षत्वाच्च । तत्रैकवाक्यत्वात्समस्त एवोभयत्र विनियोक्तव्यो देवस्य त्वेत्यादिवदिति वाक्यादेव गम्यते ।

पूर्वपक्षस्तु

तदनयोर्विरोधः । अस्यैकवाक्यत्वे निश्चिते पश्चात्तदुपपद्यते ऽभिधानसामर्थ्यं कल्पनीयं । यत्केश्चिद्वाक्यस्यावि
नियोगो भवेत् । यथा देवस्य त्वेत्यादिमंत्रे अग्नये निर्वपामीति पदयोः समवेतार्थयोरेकवाक्यतया अग्नाद्युपपदं
नतराणां सामर्थ्यकल्पनानुपपत्तावेकवाक्यत्वनिर्वाहाय कल्पितसामर्थ्यं न त्वप्रार्हत्वमर्हतीति । किं तु विनियोजिकां श्रुतिं
कल्पयतु समस्तमंत्रविनियोजिकामेव कल्पयनीति वाक्यस्योपपत्तौ बलेन बलवत्त्वान्न समस्तस्यैवोभयत्र विनि
योग इति । सिद्धांतस्तु । यद्येकवाक्यतामवगम्यैव सामर्थ्यमवधार्यते तत्रोपपत्त्या वाक्यं बलवद्भवेत् । न त्वेवं प्रमु

राम
५८

116

इ प्रकाशानसमर्थः पूर्वभागः स्यादनप्रकाशानसमर्थःशेषभागइतिप्रतीताभ्यांतत्सामर्थ्याभ्यांकृप्तेनश्रुतिद्वयेन बु

ताबद्दृतसामर्थ्यानांसंनिहितपठितानांपदानांसामर्थ्यवशेनप्रयोजनैकत्वाचएकवाक्यत्वावधारणंयावेतिपदानिप्र
धानमेकमर्थप्रतिपादयितुंसमर्थानिविभागेसाकांक्षाणियुनवेतितावेनिरेकंवाक्यंभवति॥ अनुष्टुपश्चार्थमेतत्प्रकाशप्र
नःप्रधानेःसदनसादनेवात्रतयाश्रूतेःतथाचसदनेशागेवेद्वाभयोःप्रत्येकंविनियोगसिद्धेतावत्तेवप्रकरणपाठोपपत्तौ
समस्तमंत्रस्यैकवाक्यतावुद्धिरूपत्वान्नाप्यभासीभवतिलिंगेनवाधात्ःतथाहिमपिसामर्थ्यनकल्पतरंकल्पयितुं
हेतौ तत्स्यविप्रकर्षा ████ द्वाक्यंदुर्बलंःतस्माद्यत्रावांतरवाक्यविरोधिलिंगंनास्तितत्रसमवेतार्थकेनएकेनपदेनहा
नि स्यांत्रिभिर्वासिद्देकवाक्यतापयंतरासामपिसामर्थ्यविधोजककल्पनाकल्पनानुकूलंकल्पयतियथाऽत्रैवस्योनेनइ
त्यादिभागानांवाक्यप्रकल्प्यायोर्थयोर्दर्शपौर्णमासप्रकरणेइदंद्यावापृथिवीभद्रमभूदित्यादिकःसूक्तवाकनिगदः
पठितःतत्रचा इंद्राग्नी इदंहविरजुषेतामवीवृधेतांमहोज्यायोक्रातांअग्नीषोमाविदंहविरजुषेतामवीवृधेतांमहो
ज्यायोक्रातामित्यवांतरवाक्यद्वयेश्रूयतेतत्रपौर्णमास्यामिंद्राग्नीनदेवतेइतिलिंगात्तत्पदमपनीयते अमावास्यायां

117

का॰ वं॰
५८

तुसमवेतार्थत्वात्तत्प्रयुज्यते। नत्वेवं संदिह्यते। इंद्राग्निपदैकवाक्यतापन्नानि अवीवृधेतामित्यादिपदानि तत्रापनेयानि स्यु
र्वा प्रयोक्तव्यान्येवेति। त समकरणात्प्रयोगः प्रतिभाति असमवेतार्थत्वपादेवतामात्रस्यापनयनात्। वाक्यानुसारेणान्यपने
यानीति प्रतीयते। येन सह पदैकवाक्यतापन्नैतेन सहैवैतदपनयनीयमित्यात। तदनयोर्विरोधः। तत्र प्रकरणमेवांगसंबंध
प्रतिपादकं। अतस्तस्य बलवत्वात्शेषभागाः प्रयोक्तव्या एवेति पूर्वपक्षे सिद्धांतः। प्रकरणं विनियोगस्य च रूपसामर्थ्य
मनपेक्ष्य न विनियोजकं येनैवं भवेत्। किं तर्हि तदपेक्षमेव। कर्मसामर्थ्यापेक्षोऽहं देवयज्यया प्रजया पशुभिरभिष्वजनिषी
येति प्रयानुमंत्रणमंत्रे देवताविरहिणो इंद्रीपदस्य यो नैव विनियुंक्ते इति लक्षणोपसंहारः। साहस्यबहुदशाहीनस्येत्य
त्रवस्काहविधेयसोमयागस्वरूपे संयोगोऽन्योन्याश्रितोपसंहारादैहादशोपसत्तां नवीधयति। सा पुनर्बहुदिवसविधेया सोमपा
गरूपाहीननामककर्मविशेषणीयते। अस्माद्व... ऽनाविस्पनुवास्यमानात्। स्वरूपालोचनाद्यात्... लिंगेन वाक्ये
नवा संदिग्धत्वे प्रहाणिके नयस्य पमयनीयते। यदाऽन्यत्र नीयते तद्धिहायावशिष्टेन प्रकरणाकांक्षा पूर्यते। यत्र विरोधि

राम
५८

118

श्रुत्यादिकं नास्ति तत्र प्रकरणं विनियोजकं । यथा समिधो यजतीत्यादिबोधितस्य समिदादेः अत्र हप्रयाजलिंगेनैं द्रास्तिनागे
ऽपनीयते तथा वाक्येन तच्छेषभागोऽपीति ... कप स्यान्यस्य त्विकस्य प्रकरणस्य वक्तव्यः ॥ न च तथा लभ्यस्यास्ति द्वं यतो वाक्योप
दानां संबंधः प्रत्यक्षसिद्धः । प्रकरणे तु आकांक्षावशात् कल्पनीयः । तथा च वाक्ये प्रथममेवाभिधानसामर्थ्यं कल्प्यते । त
तस्तेन श्रुतिः । तया विनियोग इति तृतीयः कालो विनियोगस्य । प्रकरणे तु प्रथमं वाक्ययोः संबंधः कल्प्यते । ततः सामर्थ्यं ।
ततः श्रुतिः । अथ विनियोग इति चतुर्थः कालः । ततो व्याख्यातप्रमेयो शेषभागस्यापन्नये सिद्धे श्रुत्याद्यविरुद्धे किंचिद्वि
रो । वाक्यविरोधादिति । प्रकरणस्थानयोर्यथा । राजसूयस्य प्रधानेनानीकर्मात्मकस्य प्रकरणे प्रधानादभिषेच
नीयादनंतरं देवनः शौनःशेपोपाख्यानमाम्नातं । तत्र किं समस्तराजसूयेनांगं । आहोस्विदभिषेचनीयमात्रमिति संदेह
तत्र प्रकरणस्य बलवत्त्वात् सर्वांगता ऽवगम्यते । स्थानस्य तु बलवत्त्वे ऽभिषेचनीयांगता । तदनयोर्विरोधः । पूर्व
पक्षोक्तासंभवेऽप्यनयोरपि तत्त्वाबलात् । अयमेति शुनःशेपो राजन्ह स्थादेः गामानयप्रासादं परस्पत्यादावनुभयविरहेण

119

का॰प्र॰
६०

न्यायावोधात्॰ तथापि विनिगमनाविरहाद् उभयोरुक्तत्वबलाच्च विकल्पेनांगतास्त्विति पूर्वपक्षे सिद्धान्तः॰ आकांक्षासंनि
धाभ्यामपि विनियोगप्रयोजके हेतुमयसमतं॰ राजसूये चकयस्याद्दिलाकांक्षास्त्रियस्य प्रवृत्तिप्राबदनुवर्तते संनिधा
नं च प्राकरणिकत्वेन सर्वदानुवृत्तसंनिहितत्वाद्दस्तु वे॰ अभिषेचनीये च स्तुत्वपि संनिधाने आकांक्षोच्छाप्या॰ तथा च
पदानुच्छिताकांक्षेन प्रकरणेन एकवाक्यलेकल्प्यनीयेत इति संनिधानाद् आकांक्षोच्छापनं॰ तथा चैकत्र सामर्थ्यकल्पनं श्रु
त्युन्नयनेन विनियोगः॰ अपरत्र एकवाक्यताकल्पनेन सामर्थ्योन्नयनेन श्रुतिकल्पने विनियोग इत्येवं सर्वविप्रकर्षो
त् स्थानस्य दुर्बलत्वात् प्रकरणेन सर्वत्र राजसूयेयो न अभिषेचनीयोपाख्यानस्य विनियोगो न तु विकल्प इति॥ स्थान
समाख्ययोर्यथा॰ दर्शपौर्णमासप्रकरणे पौरोडाशिकसमाख्याते कांडे सान्नाय्यक्रमे शुंधध्वं दैव्याय कर्मण इति मंत्रः
श्रूयते॰ स च प्रकरणाद्दर्शार्थः॰ तथा लेवनत्वसमवेतार्थतो विज्ञाते कस्यचित् तस्यावदाने विनियोग इव वेत्॰ शुन्धनीय
वाग्रहणमुपस्थितं॰ सान्नाय्यपात्रे पुरोडाशपात्रे च॰ तत्र सामर्थ्यवशात् पुरोडाशपात्रशुंधने विनियोगः प्रतिभा

रा॰
६०

स्थानवशान्नु सान्नाय्यपात्राणां तदनयोर्विरोधः। तत्र पूर्वपक्षः। पौरोडाशिका इत्येन पुरोडाशसंबद्धान्युच्यंते। तान्यधिकृत्य
इत्येकोऽयं पौरोडाशिकमिति। अतः समाख्याश्रुतित एव सा साहित्यनियोजिका। अतः क्रमप्रकरणाच्छ्रुतं पदद्वारा तदपेक्षया समा
ख्या बलवतीति। सिद्धान्तस्तु पौरोडाशिकपदेन पुरोडाशमात्रविशेषयोः संबंधमाह। किं तु पुरोडाशमात्रविशिष्टेकोऽयं विशि
ष्ट्यानुपपद्मात्संबंधस्तत्र कल्प्यते। सोऽपि न योगरीतिभावः। किं तु संबंधमात्रे तदीरेणात्मनं त्रभेदस्यापि तत्स्तुमावं
। तथा च समाख्यया पि क्रमादिकल्पनीयविनियोगेन लक्ष्य। तेन एवं च समाख्यया क्रमोऽनुमेयः। तेन प्रकरणं। तेन
वाक्यं। तेन लिंगं। तेन श्रुतिः। तथापि क्रमादिकल्पनीयविनियोग इति समाख्यायाः पंचमः कालो विनियोगस्य। स्थाने
तु क्रमः मलत्व एवेति नैकल्पनीयः। तथा च तेन प्रथमं तत एव प्रकरणमनुमेयं। तेन वाक्यं। तेन लिंगं। तेन श्रुतिस्तया
विनियोग इति पंचमः कालः। तस्मादर्थविप्रकर्षात् समाख्यास्थानतो दुर्बलेति न पुरोडाशपात्रशुंधने स्यविनि
योगः। कथं तर्हि कोऽस्य पौरोडाशिकसंज्ञा। पुरोडाशसंबंधि बहुतरघटितत्वादिति चेत्। तदयं निगलितोऽर्थः। एक

काप्र०
६१

द्विविधः पेयवत्स्वतन्त्रस्यकारित्वं व्यक्तार्थप्रतीतेरन्यलिङ्गादीनां प्रतीयते बाधिकैव व्यक्तिर्नित्यं समारब्धा बाध्यते स्फुट॰ भ
व्यमानां तु बाध्यत्वं बाधकत्वमपेक्ष्य इत्यलमतिविस्तरेणेति प्रकृतमनुसरामः पूर्वोक्तदुष्टदुष्टत्वं तौ वैषम्यादप्यनुपपन्नः
तथाहि॰ तत्र वेगव्यापारस्य स्वरूपसत एव जनकतया दीर्घत्वं संभवति॰ अभिधायास्तु ज्ञाताया एवानुकूलत्वात् व्यंग्यमि
ह तयोर्वाच्यानामादित्यन्विताभिधानवादेपि निःशेषच्युतेदो विशेषव्यंग्यत्वमेवेति स्थितं॰ किंच॰ यदि वस्तुतः तेनापदार्थान्तरेण
योन्वितः सोभिधयोपस्थाप्यते तदन्विताभिधानेन तदा वक्ष्यमाणव्यंजनावादी कार्यः॰ अन्यथा रतिं कुरु इत्यादिशब्दस्य
दुष्टत्वं न स्यात्॰ दुष्टिहेतोरसभ्यार्थोपस्थितेस्तत्राभावप्रसंगात्॰ तदर्थस्यान्यान्वयेनान्वितत्वात्॰ किंच॰ वाच्यवाच
कभावातिरेकी व्यंग्यव्यंजकभा[illegible]वानतिरेकी व्यंग्यव्यंजकभावः तुल्यवत्स्यं काव्यज्ञदृष्ट्यापि स्वीकर्तव्यं॰
अन्यथा कष्टत्वादयोऽनित्यदोषाः असाधुत्वादयो नित्यदोषा इति विभागो न स्यात्॰ वाच्यस्यार्थस्याविशेषेण कष्ट
त्वादीनामपि सर्वत्र दुष्टत्वस्यादुष्टत्वस्य वा प्रसंगात्॰ व्यंजनाभ्युपगमे तु व्यंजनीयस्य बहुविधत्वेन रौद्रादौ व्यंग्ये अनु गुण

६१

122

कूलत्वं। शृंगारादौ तु दुष्टत्वमिति प्रयुज्यते विभागव्यवस्था॥ सर्वपर्यायेषु मध्ये कस्यचिदेव कुत्रचित् काव्येऽनुगुणत्वमिति
विभावस्थानस्यात्। वाच्यार्थस्याविशेषात्। दृश्यते चासौ। यथा। द्वयं गतं संप्रति शोचनीयतां समागमप्रार्थनया कपा-
लिन इत्यादौ न पिनाक्यादिपदमनुकूलं। किं तु जुगुप्साव्यंजकं कपालिपदमेव। न चेदमप्येतद्युक्तं। अप्रत्ये-
नाभिमतस्य वाच्यत्वस्वीकार एवानुकूलत्वमिति कुलत्वयोर्व्यवस्थोपपत्तेरिति चेत् न। अभिधास्वीकारे संकेतग्र-
हे विना तदनुपस्थितिप्रसंगस्योक्तत्वात्। किंच। काव्येऽशक्त्या वा व्यंजनया वा वाच्यव्यंग्ययोः प्रतिपत्तिहेतुव्यापारभेदनिबंधनो भे-
दोऽवश्यं स्वीकर्तव्यः। वैधर्म्यदर्शनात् वा। वाच्यार्थः सर्वैरेकरूपप्रतीयत इति नियतः। व्यंग्यस्तु वक्तृकरणादिव-
शादनियतः। तथाहि। गतोऽस्तमर्क इति वाक्ये। राज्ञः सेनापतीन् प्रति शत्रूणां हठेनावमर्दनावसर इति। दूतीं नायकाभि-
सारिकां प्रति अभिसरणमुपक्रम्यतामिति। सख्या वासकसज्जां प्रति प्रियागमनप्राय एवेति। कर्मकरस्य सहकर्म-
मे कुर्वतः प्रतिकर्मकरगणान्निवर्तितव्यमिति। धार्मिकं प्रति संध्योपासनविधिरुपक्रम्यतामिति। व्यासस्य कार्य्यव

काप्र०
६२

शेन बहिर्गच्छतः प्रतिपूरं मभाइति । गृहिणो गोपालकं प्रतिसुरभयो गृहं प्रवेशयेतामिति । दिवसे दतिसंत तस्य बंधनं प्रति
सेता यो धुना न भवतीति । अपरिशंका नो भट्टानां प्रतिविकेपवक्तुं निसेद्धियेतामिति । नायका गमनप्रस्तावे सोपि हम
र्षे का या स्तत्कथकं प्रति नागतो घयेयानिति । एकस्यैव वक्तुर्बहून्प्रति लक्ष्यकस्य वचनाद्वित्वमादिरनेवधि [illegible] विधिग्यो
र्थः प्रकाशितौ वा व्यस्तं सर्वा नप्रत्यविशिष्ट एव । ननु नेतद्वाक्यवैधर्म्यं नानार्थसंबंधवादिपदे नानाविवर्ति द्रष्टीना दिति
चेत्तन । एकवाक्यवर्तिनस्तस्यापार्थेकनियमात् । यद्यनेकस्यापि तत्र लक्षणार्था बोधस्य नानालेप्यनेकार्थपदाभिधेयव
त्तिनिपतत्वमेवेति । तथापि यत्र लक्षणादिका रिसा प्रतिस्कलस्वामिनः सैंधवमानयेति पदप्रयोगस्तत्रानिपतते
दुर्वारिमितिचेत्तन । तात्पर्यो ज्ञानात् । नह्यत्र सर्वे वीक्षेः समं सर्वव्यंग्यानां भेदः प्रतिपाद्यते । किंतु गतोस्मन्मके इत्यस्य वाच्य
व्यंग्ययोः तथाव तद्वाच्यस्य निपतत्वेन दर्पणु रस्कारैरेवतत्वे षां व्यंग्यस्यापि प्रतीतेः । तदपि नियत लाभियतत्व
रूपविरुद्धधर्मसंसर्गो भिहितः । एवं विलक्षणास्वरूपकोलादिने दोपि भेदको द्रष्टव्यः । वैधर्म्ये सत्येपि यद्यभेदः स्या

राम
६२

न्नदानीलीनीलादेरपि न कश्चिद्भेदः स्यात् वैधर्म्यस्याविशेषात्। यदुक्तं। अयमेव भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः का
रणभेदश्चेति। सुप्रसिद्धश्चायं तत्र तत्र स्वरूपेण भेदो यथा भेदः। तत्र निःशेषच्युतचन्दनमित्यादौ। तात्पर्यमनुसार्य विधायैकार्यमार्याः सम
र्थ्यादमुदाहरन्त सेव्यानि तेलवाः। किमुत्सुधराराजसुजास्मरस्मेरविलासिनीनाइत्यादौ। कथमत्र विधिपदयोर्यन्निशातासि
धारादलनगलितमूर्धा विद्विषां स्वीकृता श्रीः। ननु तत्र मिहतारे रप्यसो किं न नीतानि दिवसपगतो गेवैहृशनाकी द्विरेभि
रित्यादौ वस्तुस्वरूपभेदः। प्रथमे हि वाच्यो निषेधरूपः। व्यंग्यस्तु विधिरूपः। द्वितीये वाच्यः संशयरूपः। व्यंग्यस्तु शांतेश्च
गारिणां वा वक्त्रीरितद्वितीये ककोठिनिश्चयः। तृतीये वाच्यो निंदारूपः प्रतीयमानस्तु स्तुतिरूपः। कालभेदस्तु स
र्वत्र। पूर्वं हि वाच्यः प्रतीयते पश्चात्तु व्यंग्य इति। वाच्यस्य शब्दमात्रमाश्रयः प्रतीयमानस्य तु पदशब्दैकदेशीभूतका
कादितत्त्वर्णसंघटनाद्यप्याश्रयभेदः। वाच्यस्याकरणकोशादिमात्रेणावगमः प्रतीयमानस्य तु प्रति
भानैर्मल्येनाप्याधिकेनेति ज्ञापकभेदः। वाच्येन तु स्वसत्तामात्रस्य प्रतीतिमात्रं। अन्ये न लाविदग्धप्रदवाच्यस्य सहृदय

काप्र०
६३

स्वबमलक्षितिरितिकार्यभेदः॥ गतोऽस्तमर्क इत्यादौ दर्शितनयेन वाच्य एकः॥ प्रतीयमानस्तु नानेति संख्याभेदः॥ केवलस्य ग्रही
दरोसोद्वुराधिश्वा इरसत्वं ग्रहरं सममरयऽमर्ग्घहरिवारिश्रवाभेसहसुरशरीहं इत्यादौ वाच्यार्थसंबोध्यासखी विष
यः॥ तत्र हि वाच्योऽर्थः श्रोतृमात्रवर्तिष्वते॥ प्रतीयमानस्तु॥ ममरेवास्याप्यधरः इति तेन नहूपपतिनेति भोक्तारः॥ नमेवं
वैदग्ध्यनिरासस्यप्रतिवेशिनी॥ इदं मया समाहितं॥ पुनरेवं लयानविधेयमित्यस्योपपत्तिः॥ एवं सपत्न्यादिविषयस्य भेदः॥
एवं स्वरूपादिभेदाद्वयरूपमंगीकर्तव्यौ वाच्यव्यंग्ययोर्भेदः॥ किंच वाचकव्यंजकयोरपि विवेकमन्योन्यभेदो वक्तव्यः॥ यतो वा
चकस्य संकेतितार्थापेक्षा॥ संकेतितस्य ह्यर्थेऽभिधामवर्तते॥ न त्वेवं व्यंजकः॥ अन्यत्रापि व्यंजनयामन्यपजनना गार्थः
यद्वाकृतात्पर्यविषये शब्दः प्रमाणमिति तद्दितोप्यनुपपन्नं॥ यतो व्यंग्यस्य वाच्यताभ्युपगमेपि ● नार्थ्येन्यायेन तात्प ना
र्यादिवनिघमो वाच्यः॥ अन्यथा सर्वत्र सर्वव्यंग्यप्रतीतिप्रसंगात्॥ तथा च यत्र वाणीरकुडुंगेत्यादौ व्यंग्यप्रतीतावपि
वाच्य एकवारुत्वविश्रामस्तत्र तात्पर्यविषयो व्यंग्योऽर्थः कथं प्रतीयेत॥ यत्परः शब्दः इत्युक्तमतेऽस्तु तरां॥ एतेन ना राम

६३

126

न्यर्थमेवव्यंग्यप्रतीतौ व्यापार इत्यपि निरस्तं। तस्मात्तात्पर्यमभिधायाम् प्रतीयमानेऽर्थे व्यापारः। न च सकलक्षणा। न
हि वाच्यस्य बह्वन्यस्यो पिव्यपस्थितः विशेषव्यपदेशहेतुर्वा। यतो रामोऽस्मि सर्वं सहे इत्यत्र रामपदेन सर्वदुःखभाजनत्वं प्र
त्याख्यानस्य कृते समुचिते कुरे त्यागे तरसा सोढं तच्चतथात्वं याकुलं जनबोधनेय यो वेः शिरः यथा संप्रति विभिन्नताध
नुमिदं त्वगापदः सा क्षिणाय यामेगा प्रियजीवितेन तत्कृतं प्रेमगाः प्रिये नो विनमित्य अकातरत्वं। रामोऽसौ भुवनेषु विक्रमगुणैरत्य
खरदूषणादिहन्तृत्वं च लक्ष्यते। अतो रामपदस्य लक्ष्य एवानेको भवति। अर्थान्तरसंक्रमितवाच्यादिविशेषव्यपदेशहेतुश्च
भवति। एवमन्यत्रापि स्यात्। तदुक्तं ताकेनागीस्त दन्य इति। लक्षणापि विशेषावगमक्षमकरणादिसापेक्षे शाब्दबोधे
न स्याद् अतो नास्त्यतिरिक्तः प्रतीयमानो नामार्थः। न लक्षणा यस्य नानात्वे पि हि नानावसेयवादिपयाभिधेयस्य व वियुत
त्वमेव। न खलु नियतसंबंधो मुख्येनार्थेन लक्षयितुं शक्यते। प्रतीयमानस्य मेकरणादिविशेषेण नियतसंबधो नियतसं
बंधः संबद्धसंबंधश्चेति। तत्स्वरूपं सोदाहरणमग्ने प्रदर्शयिष्यते। किं च। अत्रापि छायाफ जा ईत्यादौ विवक्षितान्यपर

सो

काप्र०
६७

तर

वाच्यैकचैलक्षणा मुख्यार्थबाधाभावात्‌ ननु तत्रापि तात्पर्यार्थानाबाधानुपपत्तिः छत्रिणो यांतीत्यत्रेवेति चेत्‌ न लक्ष
णायां प्रयोजननियमात्‌ तस्य च व्यापारांतरगम्यत्वात्‌ दर्शयिष्यते च ना स्वीकारे किं प्रथमस्यापि लक्षणायाः अपि निरूढ
लक्षणायामिवान्यत्रापि स्तु प्रयोजनानपेक्षेति चेत्‌ न यथा हि संकेतगतहसापेक्षोऽभिधा तथा मुख्यार्थबाधतद्योग
रूढिप्रयोजनान्यतरस्य मुख्यार्थसंकेतग्रहस्य च सापेक्षो लक्षणा तत्र चेयं रूढिः प्रयोजनस्य चाभावे न भवेत्‌ यतः संकेत
ग्रहसापेक्षो ह्यत एवाभिधा पुच्छभूता सेत्याहुः किंच न लक्षणाव्यंजनयोरभेदः लक्षणायामनुपजीव्यत्वदर्शनात्‌ नापि ल
क्षणानुगतमेव व्यंजनमिति ध्वनेः लक्षणामिति वाच्यं ॥ अभिधोपजीवने नापि भावात्‌ । न च लक्षणाभिधोभयानुसार्ये
व वर्णमात्रानुसारेणापि हि दृश्यते रसादिव्यंजना न च वर्णमात्रेऽभिधा लक्षणा वा । नापि शब्दानुयायि विकसन्त्येवं
कीनेत्रविभागावलोकनादिगतत्वेनापि प्रसिद्धेः तस्मादभिधालक्षणातात्पर्यविलक्षणास्तुरीयो ध्वननव्यंजनपर्यायो
तत्प्रकाशनादिपर्यायो व्यापारो न पृथग्ग्वनीयस्य तत्र [illegible] हस्त्विसिन्नर्जिहासादौ व्यंग्यो येऽभिनियतसंबंधः । कस्माद्वा

सा

राम
६७

128

होऽहं सोऽहमित्यादावनियतसंबंधः॥ नियतसंबंधत्वं च वाच्यव्यंग्यप्रतीत्योरेकविषयतात्मकत्वं। प्रथमे तस्याभावः व्यधिकरूपैक
विषयकत्वात्। द्वितीये तु तद्भावः सखीनत्वोक्तौ दि विषयभेदादिति केचित्। तन्न सम्यगाभाति। लक्ष्यस्यानियतसंबंधत्वमेव
व्यंग्यस्फुटत्वात्तथात्वमन्यथात्वं चेति पूर्वं प्रतिपादितस्य ही स्फुटोदाहरणमिति लक्ष्यसाधारण्यानियतसंबंधत्वं वाच्यं। न चोक्तेनैवाभ
वति। अन्यथा प्रथमे सर्वेषामेव सत्त्वतामतीतिः। द्वितीये तत्कालस्यैव सत्त्वं तथा अन्येषां त्व सत्त्वमिति नियतानियतसंबंधत्व
मित्याहुः। तदपि न मनोरमं। यत एवं वाच्यप्रतीतेरेव सत्त्वं तावत्सत्त्वप्रतीतिविषयत्वरूपं वैलक्षण्यमाप्युच्यते। न तु व्यंग्यप्र
तीतेः। तस्मान्नियतसंबंधत्वं तेन वाक्येन सह ज्ञाप्यत्वरूपसंबंधनियम इति पुष्कलमुत्पश्यामः॥ संबद्धसंबद्धो यथा। विवरीअर
ए लच्छी बम्हं दट्ठूण णाहिकमलट्ठं हरिणो दा[illegible]हिणणअणं रसाउला झत्ति ढक्केइ॥ अत्र हरिपदेन दक्षिणनयनस्य सूर्या
त्मकत्वं। तन्निमीलनेन सूर्यास्तमयः। तेन पद्मसंकोचस्ततो ब्रह्मणः स्थगनं। तस्मिन्न सति गोपनीयस्यांगस्यादर्शनेन नि
र्भरं निधुवनविलसितमिति संबद्धानिर्धारणं तेन [illegible] न स्तंक्रियाकारकादिपुरस्कारेण शब्दानां प्रवृत्तिर्धर्मिभाव

हा

ति

५

का०सं०
६५

मपुरस्कृत्यैतत्सेनवर्तितं· धर्मधर्मिभावश्चायं प्रपंचगोचरो वा स्यात् ब्रह्मगोचरो वा· नाद्यः· प्रपंचस्य बाध्यत्वात्· नांत्यः· ब्रह्म
णो धर्मासंस्पृष्टत्वात्· अतः पदपदार्थविभागमंतरेणैव सत्यं विज्ञानमित्यादिवाक्यमखंडमेवाखंडब्रह्मवाचकमित्याशंक्याह· अ
तस्तन्मतानुसारेणाप्रतीयमानेऽपि वाक्यस्य शक्तिरेवेत्यपि न वाच्यं· यतो व्यवहारमार्गे तैरपि पदपदार्थकल्पनाऽवश्यमंगीकर्तव्या·
व्यवहारे तेषां महदनपस्वीकारात्· यदि पदपदार्थकल्पनाऽविद्याद्वारा यामपि नांगीक्रियते कुतस्तर्हि सुसन्नाद्युत्पन्नव्यवहारः·
वाक्यार्थ एव वाक्यस्य संकेतग्रहणमास्त्विति चेत् न· वाक्यार्थस्यापूर्वत्वेनानेत्यानंत्यसंकेतग्रहस्याशक्यत्वात्· अविद्यामार्ग
तिरस्कारे त्ववाच्यमखंडयोरपि वाच्यवाचकभावः· पारमार्थिकभेदाभावात्· तस्मान्मतेऽपि विश्वादिरूपेण एवं· महिम्न दास्य·॥
मतावधसंवद्ध एव वाक्यात्मतीयते· सर्वस्मात्सर्वोपि सन्निमसंगात्· संबंधाभावं संगच्छ जनकभावोऽनवन्तानिपतादृवती निप्र
ति बहुरूपाद्रवेती स्तुपेषं· संबद्धोनस्वाधिकरणत्वेनाज्ञातेष्वं संग्रपमतिपादयति· सर्वत्र तत्सतीतिप्रसंगात्· एवं संग्रपमेन
कमावोऽनुमानरूपपर्यवसन्नः· यतो व्याप्तत्वेन सकलपक्षनिष्ठत्वेन च सपक्षसत्वविपक्षासत्वपक्षसत्वलक्षणरूपत्र

च

राम
६५

पवतो लिंगात् लिंगिज्ञानमेवानुमानं तरेतरके अनुमाने पर्वद्रुपदशक्तिते नानुमानेन रूप्यतेन त्वतिरिक्तया व्याख्येति हि तस्या
र्थः एवमनुमानादेव संप्रतीतिः तथा हि नमधर्मि अवीसत्यो सो सुरगश्चोम्न अनुमारिश्चोते रगगोलारगाइकच्छकुर्दुंगवा
लिरगादरिअसिंहेरगा संकेतनिकेतनीभंगो दावरीनीरनिकुंजेषु भावव्यादिहेतोः कदाचित् संचरतो धार्मिकस्य नि
वारणपाविनघवसाइयमुक्तिः तदत्र निकुंजवासि सिंहकृतयाक्षानिरस्मात् हेमनगा विधिर्वाच्यः स एव निकुंजान्त
मरणाद्योग्यनुमितिमभवति पतत्पद्गीरूपमरणं तत्तद्भयकारणानि रसुपलब्धिपूर्वकं लिंगं वासिंहोपलब्धिरितिव्या
पकविरुद्धोपलब्धौ पर्यवसानात् भ्रमणस्य व्यापकं भयकारणाभावोपलब्धिः प्रतीताः नहि दृष्टं भयकारणात् दु
पलब्धेः यथा नात्र हठकारस्पर्शः वह्नेः अनुमानेनैवं गोदावरीनिकुंजं स्वभीरुभ्रमणायोग्यं सिंहवत्वादिति ननु च प्र
ते स्वभीरोरवीरस्य भावस्य भ्रमणयोग्यत्वमत्र साध्यं वीरस्य भावस्य वा विशेषोदासीन्येन तत्तो मान्यमेवता अ
थ व्यभिचारः ताहक्षस्यापि प्रभोर्गुरोर्वा निदेशेन प्रियानुरागेण वा नि पिलाभा दिशंकया वा भ्रमणादर्शनात् अत्र तर

काम० ९९

२ किंतु पुंश्चली वाक्यनादरणात्ः २

वनोत्थोपि । मध्यमेन विरोधः । स्पर्शादि शोकयोरन्यथोरूपेण तया वाच्यत्वेन विस्पष्टतोपि मृगयादिकुतूहलेन सिंहवद्धेशोवीरस्या
पिन्मरणात् । किंच । पक्षे सिंहस्य डाबोनमानांतरेणावधारितः । न च तद्वचनं निष्प्रापकं । अर्थेन समं संबंधानियमात् इत्यनि
ष्टरूपाऽप्रसिद्धिः । स्वंचनिः शेषच्युते स्याद्दोत्वंदनव्येवनाश्रीनि उपभोगमप्यककर्तयोपात्तानि । नच तानि तच्छ्याप्यानि । कारणां
र
तरतोपि संभवात् । अतएवात्रस्नानकार्यत्वेनोपात्तानि । अतोऽनैकांतिकात्कथमनुमितिः स्यात् । ननु व्यतिरेकित्वेनेतरि
तिचेत् । अधमपदस्याहित्यादितिब्रूमः । अस्माकमपितत्साहित्येनानैकांतिकताव्यतिरेकव्याप्तिर्वेत् । अन्वेदष्येवं । यद्यधमत्वं
